
[illegible] 76	[illegible]	[illegible]	[illegible]	[illegible]	Benaresedition, Samvat 1892


॥ इतिपूर्वपच्छावलिसमाप्तम् ॥

अधिकरणान्वयहलपदानुवृत्तिपरं भाष्यमेकदेशयुक्तिगौरवात् तस्मान्मकारच्छेदंगासेपाधिकरणान्वयहलपदा-
नुवृत्तयोनकर्त्तव्यानक्वापिदोषलेशश्च समाः धानमुह्यम् इतिश्रीमद्धोरित्वसंदर्भितपुण्यग्रामसभासत् मैथिलपंडि
तविश्वतियम्बिर्जन्यपूर्वपक्षसंग्रहः शुभम् श्रीसम्वत् १९२८ मी॰ श्रावणशुक्लत्रयोदश्याम् १३ ।

पू॰प॰ दडोडित्वाभावे प्रथमयोरिति पूर्वसवर्णदीर्घमाशङ्क्यानुनासिकोपधत्वादित्युक्त्या दीर्घवारणाद्वितीयैकवचने ऽम्आदेःप
२७ रस्येत्यकारस्य दकारे मश्रवणेनापादानपरंभाष्यंप्रकृतेगमकं हेज्ञानेस्यादौ मनिमित्तप्रकृतिप्रत्ययसंनिपातविनाशाए
ङ्ह्रस्वादिति लोपः सन्निपात परिभाषया न स्यादिति मितिच्छेदे समाधानमुक्तं शब्देन्दुशेखरकृता तद्विरुद्धम्· एङ्ह्रस्वा।
दिति सूत्रस्थशेषत्वेरणान्त्वे हि हे लक्ष्मि इत्यादौ सन्निपातपरिमाषया सम्बुद्धिलोपो न स्यादित्याशङ्क्य गुणात्सम्बुद्धेरिति
वक्तव्ये एङ्ह्रस्वग्रहणाज्ज्ञापकात्सम्बुद्धिलोपे कर्त्तव्ये सा परिभाषा न प्रवर्त्तते। न च विशेषापेक्षके तज्ज्ञापकं सम्बु
द्धिमुपजीव्य यत्र ह्रस्वस्तद्विषये न प्रवर्त्तते इति· असति बाधके प्रमाणानां सामान्ये पक्षपातादिति न्यायात् सामा।
न्यापेक्षं ज्ञापकं संबुद्धिमात्रलोपे न प्रवर्त्तते इति· न च एङ्ह्रस्वादिति सूत्रस्थं हे ज्ञान इत्यादौ लोपोपपत्तये हल्ङ्यादानु राम॰
वृत्तिव्यधिकरणान्वयांगीकारपरं भाष्यं बाधकमस्तीति मिथं लाघवात्सामान्यापेक्षमेव ज्ञापकं सिद्धान्तिनोक्तं ठ । २

इतिसूत्रस्थपदग्रहणाकार्यं यरमदर्शनावित्यादौ मूलोक्तार्थेनापि प्रत्ययलक्षणनिषेधे ङमंतपराभावान्नङमुडित्यपरमपिलाघवमि
ति विभावयन्तु सुधियः ।२६ अतोऽम् । अत्रम् इति च्छेदे प्रथमैकवचने उकारस्येत्संज्ञालोपयोः सकारस्य मकारे कृते ज्ञानमिति
सिद्धम् । द्वितीयैकवचने आदेः परस्येत्यकारस्य कारस्य मकारे कृते म इत्यश्रवणात्स्यादिति । नच संयोगान्तलोपेन निर्वाहः झलो
झलीत्यतो झल्ग्रहणमपकृष्य संयोगान्तस्य झलो लोपान्मकारस्याझल्त्वात् । झल्ग्रहणानपकर्षपक्षे वाक्यभेदे
संयोगान्तस्य लोपः संयोगान्तस्य झलो लोप इति पूर्ववाक्यं क्वचिद्विषयणातिरिक्ते झल्यपि प्रवर्त्तते यथा गिरिविडिति ।
गिरौ वेश्म यस्य स गिरिवेश्मा तमाचष्टे गिरिवेश्मयतीति गिरिविडिति । अत्र झलो लोपे प्रमाणामभावो मशिस्त्वत्र महूयं वि
धाय मकारस्य संयोगान्तलोपे वृक्षमिति रूपसिद्धौ शित्वप्रत्याख्यानपरं भाष्यमेव वृक्षमित्यत्र संयोगान्तलोपस्या
सिद्धत्वादस्तिसिच इत्यपृक्तस्य यस्य हल्लोपानापत्त्या एकदेशयुक्तं तद्भाष्यम् । अद्ड्डुतरादिभ्य इति सूत्रभाष्ये ॥

शू. प. नगतिकारकोपपदानामित्यस्यानित्यत्वात्सुबुत्पत्त्यनन्तरमेव समास इति भावः इदमुपपदमिति सूत्रे कैयटे स्पष्टम् अयमजा
२६ दिष्वित्यनेन गत्यादेरनित्यत्वेन मानमिति तदाशयः अत एवैतत्कर्तृकरणे इति सूत्रे बहुलग्रहणफलत्वेन भाष्ये उक्तम् अम्बा
म्बेति सूत्रे गवादिग्रहणं तु निपातनार्थं तेन तद्दिस्थ इत्यादौ षत्वं नेति दिगित्युक्तं शेखर इति स्वीयग्रन्थपर्य्यालोचनया गतिकारके
त्यस्यानित्यत्वाभावे माषकुम्भवापेनेत्यादौ उपपदसमासे णत्वनिषेधार्थं पदव्यवाये इत्यत्र पदशब्दः पदत्वयोग्यपर इति म[illegible]
व्यवश्याङ्गीकरणीयव्याख्यानेन माषकुम्भवापेनेत्यादौ सर्वसमासे णत्वनिषेधसिद्धौ सप्तमीसमासे पदव्यवायेऽपि इति सूत्र
वैयर्थ्यं न च कार्यित्वनिवेशाभावेऽपि प्रत्ययलक्षणस्वीकारे कार्यित्वनिवेशो निष्फल एव किं च पर्णं नद्धमित्यत्र गति
कारके त्यस्यानित्यत्वपक्षेऽपि सुबुत्पत्त्यनन्तरं कुगतीति समासे पदव्यवाय इति सप्तमीसमासे कार्यित्वनिवेशे सत्यपि प्रकृ
तेन द्धमित्यस्य णत्वनिषेधरूपकार्यित्वसत्त्वात्प्रत्ययलक्षणनिषेधेऽपदपरत्वाभावान्निषेधाभावे णत्वापत्तेः अट्कुप्वा
ङिति सूत्रे आङ्ग्रहणवैयर्थ्यापत्तेश्चातः कार्यित्वनिवेशोऽपि पदव्यवाय इत्यत्र पदशब्दः पदत्वयोग्यपरः विभक्त्यन्तरान २६
पेक्षयाल्लोकेऽर्थबोधजनकपदो वा सर्वैरगत्या वक्तव्य एवेति कार्यित्वनिवेशाभावेऽपि माषकुम्भवापेनेत्यादौ सप्तमी
समासेऽपि न दोषः किं चाजादेः पदस्येत्येतन्मात्रार्थं ङमुट्सूत्रेऽनुवृत्त्यर्थमुत्त्रिचपदे ॥ ॥ ॥ ॥

त्तरपदेतिवार्त्तिकाद्वृत्तौप्रत्ययलक्षणेनैवपदत्वात्·परपदस्याजादेशत्वात्स्थानिवत्त्वनिषेधान्नावङ्·अत्रोच्यते·गति
कारकोपपदेतिपरिभाषयासुवुत्पत्तेःप्राक्समासेपरपदस्थेत्यत्रपदशब्दःपदत्वयोग्यपरइतिभवदुक्तेःप्रकृतेदोषाभा
वात्· अतएवइतिकर्तव्यम्·पदव्यवायेपीतिसूत्रस्थंवार्त्तिकम्आर्द्रगोमयेणेत्याद्युदाहरणम्· एतद्वार्त्तिकप्रत्या
ख्यानायभाष्येपदव्यवायइतिसप्तमीसमासेनिमित्तनिमित्तिनोर्मध्येयत्पदंव्यवधायकंतस्यपरपदत्वंयत्रास्तितत्रण
त्वनिषेधइत्यर्थेआर्द्रगोमयेणेत्यादौव्यवधायकस्यगो· परपदत्वाभावात्सत्वनिषेधोनएवञ्चमाषकुम्भवापेनेत्यादावपिवाप
त्यस्यपदत्वंवक्तव्यम्·प्रत्ययलक्षणेनैवतच्चदुर्लभम्· कार्यित्वनिवेशाभावेमध्यमपदानाक्रान्तोत्तरपदत्वाभावा
दुत्तरपदत्वेचेतिप्रत्ययलक्षणनिषेधात्· तन्निवेशेतुकार्यित्वाभावात्प्रत्ययलक्षणप्रवृत्त्योत्तरपदपरत्वाण्णत्वनि
षेधः तथाचकार्यित्वनिवेशःसफलइतिचेन्नैवम्·सिद्धान्तेपिमाषकुम्भवपत्नीत्युपपदसमासेसुवुत्पत्तेःप्राक्सो
त्कृतेचतत्रणत्वनिषेधायपदव्यवायइत्यत्र पदशब्दःपदत्वयोग्यपरइत्यर्थोभट्टैरवश्यंस्वीकर्त्तव्यः
नचगतिकारकोपपदेत्यस्यानित्यत्वात्सुवुत्पत्त्यनन्तरंसमासेकार्यित्वनिवेशप्रत्ययलक्षणेन पदत्वपरत्वात्प्रवृ
त्तेनिषेधेपदशब्दस्यपदत्वयोग्यपरत्वेमानाभावइतिवाच्यम्·धनक्रीतेतिप्रतीकमुपादायकर्तृकरणेइत्यत्रवहुलग्र

पू·प· तिकवापत्तेः श्रीणामित्यादौसन्निपातेतिनुडनापत्तेश्च·ऽप्रवृत्तेः·अत्रप्राचोक्तं·भवतेरितिकर्तृनिर्देशाद्भावकर्मणोर्नो
२५ त्व म्· व्याख्यातंचतत्पौत्रेणाकर्त्रर्थयोश्शपानिर्देशादिति· तन्न· धातुनिर्देशमात्रेश्शपोविधानाच्छपश्चविकरणात्वे
नानर्थकत्वात्कर्त्रर्थेपरेविहितस्यश्शपःशित्वसामर्थ्यादेवेहप्रवृत्तेरितिमनोरमा· अन्यः अत्राशङ्क्यतेश्शपंशित्वस्यार्द्ध
धातुकव्यावृत्त्याचरितार्थत्वात्तेनार्द्धधातुकस्येडितीडागमाभावः नचतत्रतितुत्रेतिइण्निषेधः एवमपिब्रवीती
त्यादौहलादेःपितःसार्वधातुकस्यविधीयमानोब्रुवइडित्यनेनेडागमोनस्यात्· शित्वाभावेआर्द्धधातुकत्वात्· ॥
उत्तरपदत्वेचेतिवार्त्तिकेपूर्वदराडप्रियाइत्यादौत्रिपदेबहुव्रीहौकृतेप्रियाशब्देउत्तरपदेपरेतद्धितार्थोत्तरेतिद्वयो
स्तत्पुरुषेनलोपार्थमवश्यंमध्यमपदत्वामाक्रान्तेतिवक्तव्यम्· मध्यमपदत्वानाक्रान्तविशेषणेनैवमाषकुम्भवापेनेत्यादावपि
कुम्भेत्यस्यमध्यमपदत्वात्प्रत्ययलक्षणासिद्धोपदव्यवायेनेतिणत्वनिषेधेसिद्धेकार्यित्वनिवेशोनकार्यइतिचेन्नैवम्· गोचे।
त्यादावल्लोपस्यस्थानिवत्त्व मादावङ्प्राप्तौनपदान्तेतिसूत्रेभाष्येवेतस्वानित्यादौस्थानिवत्त्वनिषेधाभावम्लवर्णत्वामा
भावायपदेऽन्तइतिसप्तमीसमासेप्रत्यासत्त्यापरपदस्याजादेशोनस्थानिवदित्यर्थान्नजायतेगोचेत्यत्रपदत्वंतुसुवन्तेनसमा। राम·
सेप्रत्ययलक्षणेनैवपदत्वात्तच्चदुर्लभमुत्तरपदत्वेइतिनिषेधात्· कार्यित्वनिवेशेतुप्रकृतेकार्यित्वाभावादु ९ ४४ २५

वाञितिणितिकिति च परे इति प्राप्ते नातः परस्यानुत्तरपदवृद्धिप्रतिषेधात्पूर्वस्य वैकल्पिकत्वेनाभावाच्चोपपादितं तत्र हीत्यादिना ग्रो
थरे उक्तं तदयुक्तम् अनेन निषेधाभावेपि नकोपधाया इति निषेधसत्वान्न तद्धितविग्रहणमित्युक्तत्वेपि तस्मादुपलक्षणमिदं अ
ई प्रस्थभवा आर्द्रप्रस्थी भार्या यस्य तत्राप्यरक्तविकार इति पर्युदासेन तद्भिन्नः पि वृद्ध्युत्पादनयोग्यत्वे सति यत्किंचिद्वृ
द्धिकारकः तद्धितं एव गृह्यत इत्यर्थाश्रयणात्तु आर्द्रप्रस्थिकी भार्या न निषेधः यत्किंचिद्वृद्ध्युत्पादकत्वाभावेत्र प्रयोगेन वाचा
निमित्तग्रहणं मास्त्विति समाधानं संगाधयेति विभावयन्तु ७० सर्वनाम्नः स्याड्ढ्रस्वश्च आमि सर्वनाम्नः सुट् अत्रायं पूर्वपक्षः
अश्वक्षीर इति सूत्रानन्तरं सर्वनाम्नो याट् सुट् ततः आमि ततः स्वेस्व य इत्येवं कर्तव्यमिदं च सूत्रद्वयं मास्तु ७१ उदीच्या
मातः स्थाने यकपूर्वायाः अत्रौदीच्यामातः स्थाने इत्येवास्तु तथा सति प्रतिपदोक्तपरिभाषया आपोन्यत्र स्थाने इत्या
र्यग्रहणे आर्षिका आर्यकेत्यादिसिद्धिः ७२ अपरिमाणबिस्ताचितकम्बल्येभ्यो न तद्धितलुकि अत्र न तद्धित इत्ये
वास्तु लुग्ग्रहणं मास्तु प्रत्यासत्त्या तद्धितद्विगोरेव तदन्तान्ङीं विस्पर्थे समाहारनिमित्तके द्विगौ पञ्चाश्वेत्यादौ
निषेधो भविष्यतीति विभावयन्तु सुधियः ७३ गोरतद्धितलुकि अत्र गोरलुकीति न सूत्रितं सामर्थ्यात्सामासिके प्रवृत्त्याव
पिवस्यमाणे धातुप्रयुक्ते लुकि दजनापत्तेः ७४ ङिति ह्रस्वश्च वामि अत्र सूत्रद्वये वामि ह्रस्व इति न सूत्रितं सुदनमनीत्यादौ न घृत

त्वस्यादिति प्रकृतसूत्रे शेखरकृतोक्तं· तदयुक्तं· पुर्वसूत्रे तमब्ग्रहणादीप्सितपदेन प्रवर्त्तते· इप्सिततमे तु पूर्वसूत्रारम्भसा।
पु॰प॰ २४ मर्थ्यादेव न प्रवर्त्तते· अर्थादीप्सितस्यैव तस्य विषय इति वारणार्थानामित्यस्यानवकाशत्वादग्ने माणवकं वारयतीत्यादौ
न काप्यनुपपत्तिरत एव मनोरमायामनीप्सितेग्रहणस्पष्टार्थेनत्वावश्यकमित्युक्तं· ६७ अभिनिविशश्च· अत्र सूत्रे शेखरेऽभिनि
वेशः आग्रहः सन्मार्गविषयक आग्रहवानित्यर्थ इत्युक्तं· तदयुक्तं वैयाकरणमते क्रियाविशेष्यकशाब्दबोधाभ्युपगमादित्यु
क्तं· नन्न· आग्रहशब्दोऽपि आत्मजनतः सकर्त्तीयस्य व्यापारस्य स आग्रहवान् व्यापार इति क्रियामुख्यविशेष्यकशाब्द
बोध एवेति हेतुमति चेत्यादौ धर्मिवाचकान्मतुब्दर्शनादिति अस्मिन्नेव सूत्रे व्यवस्थितेति मूलप्रतीकमुपादाय परो
त्विस्यादि आहुरित्यन्तमुक्तं· तदयुक्तं· एतद्दृष्ट्या षत्वस्यासिद्धत्वादविकृततायाः श्रवणं ज्ञानमस्त्यस्य वा तस्य वश्रवणा
मित्युक्तं· अथवा विकृततायाः अविकरणस्येत्यर्थ इति न काप्यनुपपत्तिरिति समाधानं कुर्वन्तु तदनुयायिनः ६८ वृद्धिनि
मित्तस्य च तद्धितस्यारक्तविकारे· अत्र फलोपहितस्यैव निमित्तत्वेन विवक्षितत्वाद्वैयाकरणभार्येन पुंवत्त्वनिषेध इति २४
मूलप्रतीकमुपादाय वैयाकरणभार्य इत्येव· वृद्धिसंज्ञकावेतौ भवत इत्यर्थात्· फलोपहितग्रहणे फलं अ... स्यकी
भार्य इत्यत्र ६९ अर्द्धात्परिमाणस्य पूर्व — स्य तु वा· अर्द्धात्परस्य परिमाणवाचकस्योत्तरपदस्य नित्यं वृद्धिः पूर्वपदस्य

स्यपदत्वान्न । मुहुःस्थाद्युत्तरपदत्वे चेति प्रत्ययलक्षणनिषेधस्तु न । माषकुम्भवापेनेत्यत्रेव पदव्यवायेपीति निषेधसिद्धये तस्य यत्रोत्तरपदस्य का
र्यीत्वं तत्रैव प्रवृत्तेः तेन सिद्धमित्येतत्सूत्रस्य भाष्योक्तिस्त्वेकदेशिनोऽप्युक्ता नहि रूढं पूर्वेदशि प्रिय इत्यादौ नलोपार्थं वार्तिकं मध्यम
पदानाक्रान्तोत्तरपदग्रहणस्यावश्यवक्तव्यत्वाच्छेखरकृता समासाश्रये उक्तत्वाच्च माषकुम्भवापेनेत्यादावपि प्रत्ययलक्षण
निषेधाप्रवृत्तेः सुपपादत्वात्पदव्यवायेपीति निषेधः सिद्धः तेन निषेधेन सिद्धमित्येतत्सूत्रस्य भाष्योक्तं च संगच्छते मध्यमेति
विशेषणोक्तेपि पंचगवधनश्च्यादिप्रत्ययलक्षणोसत्त्व वडि । यस्येति लोपे रूपसिद्धिः सोपदादौ । ८५ अत्र स्के प्रत्यय इ वि
न्यासएवसुवचः नचोरस्कायतीति विग्रहेसुव्युत्पत्तेः पूर्वंसमासे उरस्केनेत्यादौ सत्वं न स्यादेवेति वाच्यं अन्यस्यासंभ
वइति मनोरमाप्रतीकमुपादाय पदेशाइत्येव कुप्वोरित्यनुवर्त्य यस्मिन्विधिरिति पदादि विधौ कवर्गादावपदे इत्यर्थेन
सिद्धे आदिग्रहणमपदस्येवादिरित्यर्थलाभार्थं । तेनोरस्केनेत्यादौ सुव्युत्पत्तेः पूर्वसमासेन सत्वमादिग्रहणसामर्थ्याल्लभ्या
तथा गोनपदत्वयोग्यप्रातिपदिकावयवकुप्वोर्ग्रहणमिति शब्दरत्नकृतोक्तत्वाद्यथान्यासेपि सत्वं नेष्यत इति न कापि दो
षः तथा युक्तं चैतन्नोऽस्मितं । अनोऽस्मितपदाभावेई अस्मितप्रकर्षहोनस्याप्यनेन संज्ञाप्राप्तौ वारणार्थो नामित्य । नव काश

पू॰ प॰ संगत्यापत्तेरिति दिक्॥ ६३॥ यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते॰ आने मुगिति मुग्विधानसामर्थ्यादेषाऽनित्या॰ अन्यथा प
२३ च्यमान इत्यादावकारस्य मुक्यनया परिभाषया विशिष्टस्य सवर्णे दीर्घे तद्वैयर्थ्यस्य स्पष्टमेवेत्युक्तं परिभाषेन्दुशेखरे तदन्नयुक्तं॰
अकाराकारयोः कण्ठस्थानिकत्वेन मकारस्योष्ठस्थानिकत्वेन तत्र जायमानो दीर्घः कण्ठोष्ठस्थानिक ओकार ओकारो
वा भविष्यति॰ सूत्राभावे तु सन्न सिध्येदिति सूत्रवैयर्थ्याभावेन ज्ञापकतानसंभवतीति॰ किंच शानचः सार्वधातुकत्वे।
न सार्वधातुकमपिदिति ङित्वात्त्रासप्रसक्तौ ङित्तडितीयादेशस्य सूत्राभावे वारणस्याशक्यत्वात्॰ तत्सत्त्वे तु येन नेति।
न्यायेन तद्वारणादिति ज्ञापकतानसंभवतीति तु न अकारस्य कण्ठस्थानिकत्वे न तत्र जायमानस्याक्कवद्भावस्य इति
परिभाषया कण्ठस्थानिकत्वे स्थान्यतिदेशादागमे आगमिधर्मवैशिष्ट्यमपि बोध्यत इति सिद्धान्तात्॰ किंचाकारयोः।
कण्ठस्थानिकयोर्मात्राद्वयेन तन्मध्यप्रविष्टस्य मकारस्यार्धमात्रिकत्वेन मत्त्रग्रामादिवत् भूयसा व्यपदेशभाक् जायमाने।
दीर्घे आकार एक एव भविष्यतीत्यादेशबाधकत्वात् ङि॰ नह्यस्याग्रे आनस्येनेतिन्यासेन सिद्धिरिति ज्ञापकतासंभ
वत्येवेति नवीनग्रन्थस्वरसाल्लवोरटन्ति॥ ६४॥ ङमो ह्रस्वादचि ङमुण्नित्यं॰ अत्र शेखरकृता ङमः परस्याजादेः पदस्य ङमुडि। सि॰ २३
त्रिभाषोक्तसिद्धान्तेऽर्थे परमदण्डिनावित्यादौ न दोषो मूर्धन्या ज्ञेया काले तु अनन्तवर्तिविभक्त्यादण्डिनित्य ६

अनिटइत्यनुवर्त्तनादाहार्थस्यसेटोग्रहणाभावइतिकैयटेनोक्तम्· अत्रायंपूर्वपक्षः श्लिषइतियोगस्याङ्·बाधकत्वंयद्भाष्योक्तं·न
दवष्टंभेनकथंश्लिषश्लिकरणास्यात्रपाठःसाध्यते·एकाचउपदेशेइतिसूत्रेऽनुदात्तपरिगणनाऽवसरेविश्लिष्टइत्येवपठितव्येदाहस्यात्पनि
षृत्वेबाधाभावात्· नहिदाहार्थस्यसेट्कत्वाङ्गीकारंविनातत्सूत्रभाष्योपपत्त्यभावः उभयोरनिड्कत्वेदाहार्थस्यपुषादित्वेतदंशेङ
ङः प्राप्त्यभावेनप्रतिप्रसवार्थेश्लिषइतियोगे फलत्वेदाहार्थग्रहणेपुषादेरग्रहणेनबाधकत्वोक्तस्यसम्यक्त्वात्· नचोभयो
रनिड्कत्वेदाहार्थकर्मणिचिणःप्राप्तस्यबाधःश्लिषइत्यस्यसार्थक्येनपुषादिपाठबलप्राप्तस्यालिङ्गार्थेश्लिषःस्यतेरन्यत्रपाठे
नापिसिद्धेःपुषादिपाठेनश्लिषग्रहणरूपसामर्थ्यप्राप्तस्या ङः श्लिषइतिविभक्तेनबाधानापत्तौअङ्बाधकत्वासं
ङ्गतिः दाहार्थस्यसेट्कत्वेतुश्लिषइतिविभक्तेअनिटइत्यनुवृत्त्यातदग्रहणोपरिशेषात्पु षादिपाठप्राप्ताङ्·बाधकत्वस्य
व्यतयापर[illegible]णाङ्·क्सयोःअवश्यवक्तव्यतयापाक्षिकबाधमादायाङ्बाधकत्वोक्तिरितिवाच्यं·दाहार्थस्यसेट्कत्वेना
निटइत्यनुवृत्त्यातद्ग्रहणाभावेपिपुषादिविषयेपिचिणबाधकेनचरितार्थस्यविभक्तस्यपुषाद्यङ्बाधनार्थत्वेनदाहार्थ
स्यसेटोतद्बाधायोगेनाङ्बाधकत्वस्यममापिसम्यक्त्वादितिचेन्नैवम्·विभक्तस्यदाहार्थकेचिणबाधनंफलमुतपुषा
द्यङ्बाधनमितिसंशयेपुषाद्यङ्बाधकत्वकल्पनेपूर्वोक्तरीत्याविकल्प पत्त्याचिणग्रहणस्यनित्यार्थतापत्त्याभाष्या

पू.म. त्रनिषेधाप्रवृत्तिः स्थानिवत्वनिषेधज्ञानेतन्निर्णयेचस्थानिवत्वाभाव ज्ञानमित्यन्योन्याश्रयस्तत्राप्रवृत्तौवीजमि
२२ त्यत्रशेखरोविरुद्धइतिसिद्धोयः पदान्तस्तत्रनिषेधः स्थानिवद्भावेसतियः पदान्तइतियावत्. कानिसन्तीत्यादौवेत
स्वानित्यत्रस्थानिवत्वेनहिपदान्तइति; अत्रार्थसमादधनुकुशाग्रवुद्धयः उत्तरखण्डस्यैवधातुत्वमिति।शेखरेप्रय
त्नश्चेत्या दि ग्धानोतित्यनेनोत्तरखण्डात्पूर्वमुपसर्गप्रयोगःस्यादितिदूषणंनस्यादिचभ्यासेनचाभ्यासस्येतिसू
त्रेणोपसर्गात्परेषामेषामेवनान्येषामितिसूत्रवैयर्थ्येनोपसर्गात्अभ्यासात्पूर्वमेवप्रयोक्तव्याइति. ६२ ग्रहिज्यावयिव्यधि
वष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनांङितिच. अत्रसूत्रेवयिग्रहणंनकर्त्तव्यं. वेञः सत्वाहृचिस्वपीत्येवंसिद्धम्.
वेञइतिनिषेधस्तुलिटिवयोयइतिज्ञापकान्नेतिवोध्यम्. वश्चास्यान्यतरस्याम्. वेञइतिसूत्रादग्रेऽन्यतरस्यांकितीत्ये
वसंप्रसारणविकल्पेसिद्धेवश्चेतिसूत्रंव्यर्थम्. परत्वादतोलोपेसंप्रसारणेचकृतेवार्णापरिभाषयोवङ्. वाधित्वाल्लोप
स्यैवप्राप्त्यास्यापिनित्यत्वात्. नचोवङि. कर्त्तव्येआभीयासिद्धत्वं. तस्यानित्यत्वात्संप्रसारणाभावेववयिथेतिसं
भाव्येत. ततोल्यपिचेतिचशब्देन. लिटीत्यनुकर्षणाद्धवोन्चवप्रियथुरितिसिद्धमेवेतिदिक्. अनिड्कारिकाव्याख्यावसरे राम
स्थिष्यतीतिप्रतीकमुपादायश्यनानिर्देशाच्छिषधातोरिड्नेइतिसूत्रभाष्यप्रामाण्यात्तद्धिपेषइतिविभक्तोविहितकस्य २२

विशेषसत्त्वादुक्तनुड्विधायकशास्त्रस्थभाष्यासंगतिः स्पष्टैवातो हलन्तेभ्यः
श्चोयद्याचारः क्विप् संभवति तर्हि मिदचोन्त्यात्परविषयविशेषसत्त्वादुक्तनुड्विधायकसूत्र
सामान्यतस्त्राचोरक्विपूनास्तीतिरुक्तप्रमेवस्त्रियामेत सूत्रस्थभाष्यप्रामाण्यादिति शेखरो विरुद्ध एवेति वाच्यं नुड्विधायकसूत्र
सामान्यतस्त्राचारक्विबूनास्तीति रुक्तप्रमेवस्त्रियामेत सूत्रस्थभाष्यप्रामाण्यादिति शेखरो विरुद्ध एवेति वाच्यं प्रकृतिसत्त्वात्कर्तृक्विप्यनभिधानादन्तरङ्गानपीति प।
स्थिनभाष्येणालिटस्त्राचारक्विप एवं हलन्तेभ्योनभिधानं तत्रैवामः प्रकृतिसत्त्वात्कर्तृक्विप्यनभिधानादन्तरङ्गानपीति प।
स्थिनभाष्येणालिटस्त्राचारक्विप एवं हलन्तेभ्योनभिधानं नुड्विधायकसूत्रस्थभाष्यप्रामाण्येमाचारक्विपूनास्तीति परिभाषेन्दुशेखरो।
रिभाषाज्ञापनावसरे सामान्यतो हलन्तेभ्यो नुड्विधायकसूत्रस्थभाष्यप्रामाण्येमाचारक्विपूनास्तीति परिभाषेन्दुशेखरो।
रिभाषाज्ञापनावसरे सामान्यतो हलन्तेभ्यस्तदभाव इति ह्रस्वनद्याप इत्यत्र भाष्ये स्पष्टमिति
क्तिरुगिदचामिति सूत्रे स्त्राचारक्विबर्वाचीनमतेन वस्तुतो हलन्तेभ्यस्तदभाव इति ह्रस्वनद्याप इत्यत्र भाष्ये स्पष्टमिति
शेखरोक्तिश्च चिन्त्येति विदांकुर्वन्तु ——— सुधियः स्त्राचारक्विपि तु लक्ष्मी - स्त्रादिशब्दे कृदिकारादिति प्रकृत्यानुपस
र्जनादिस्यस्य साफल्येसति न तोऽपि सुलोपे लक्ष्मीत्यपि कथंतदन्तविधौ ज्ञापकता इति स्त्रियामेतद्भाष्ये उक्तं तत्र लक्ष्मीश।
ब्दे स्त्राचारक्विपोऽनभिधानेऽनुपसर्जनादिति सूत्रं तदन्तविधिं ज्ञापयतीति ह्रस्वनद्याप इति सूत्रस्थभाष्येण सह स्त्रियामि
ति भाष्यविरोधलेशोपि हलन्तेभ्यः सामान्यानभिधानेप्याचारक्विवनप्रकृतिककर्तृक्विपः एतेन भाष्याशयमबुध्वानेत्र
निमीत्यव्याचक्षाणो नान्तरङ्गानपीति परिभाषोक्त ‾ परिभाषेन्दुशेखरश्चिन्त्य इति परास्तं ६१ न पदान्तद्विर्वचन अत्र सू
त्रे वेतस्वानित्यादिशास्त्रेणालोपः शाकल्यस्येति सूत्रे अशि किमित्यादि किं च स्थानिवत्त्वनिषेधं विनास्य पदान्तत्वासिद्धा

पू.प. रुगायतिक्रान्ता नगरीत्यत्र ङीन्नेति चोक्तं शब्दरत्ने॰ अन उपधेति शेखरेऽनुपसर्जनादित्यनुवृत्तमन्यत्र न संबध्यते॰ तस्य ग्र।
२९ ह्यमाणविशेषणतया गृह्यमाणस्यानो बहुव्रीहावनुपसर्जनस्यासंभवात् ध्वनितं चेदं वनो र चेति सूत्रे भाष्ये॰ तत्र ह्यनो।
बहुव्रीहेरित्यस्यानन्तरमुपधालोपिनो वेति न्यासो दर्शित इति चोक्तं उभयोः परस्परस्य विरोधः स्पष्ट एवेति विरोधपरिहारनु
शाब्दिकाः ६० अनुपसर्जनात्॰ अधिकारोऽयं यूनस्तिरित्यभिव्याप्य॰ अयमेव स्त्रीप्रत्ययेषु तदन्तविधिं ज्ञापयतीति मू
लग्रंथस्त्वाचारक्विबन्तप्रकृतिककर्तृक्विबन्तानामनभिधानमेवैत ज्ज्ञाप्यप्रामाण्यादिति शेखरग्रंथस्यायंभावः य
द्यप्याचारक्विबन्तात्कर्तरि क्विप्युपसर्जनत्वमिति परं तु तत्राल्लोपस्य सत्त्वादकाराभावाट्टिड्ढेति सूत्रस्य प्राप्त्यभावादवङी।
पो वारणं भविष्यतीत्यनुपसर्जनादित्यस्यात्रोपयोगाभावात्॰ भाष्यकारोक्तज्ञापकतासुस्थितेत्याचारक्विबन्तप्रकृतिककर्तृ
क्विपोऽनभिधानाभावादेतादृशलेखनस्योपयोगाभावाच्छेखरे सुलोमानङ्गानि वाचरतीत्यर्थेन डुह शब्दात्गौरादि पठि
तादाचारक्विबन्तात्कर्तरि क्विप्यनुपसर्जनादित्यस्य फलं स्पष्टमेव भाष्यकारोक्तज्ञापकताविरुद्धः ऽतोऽनभिधानं एतज्ज्ञा।
प्यस्यैवमानत्वाल्लेखनस्य चेदानीमुपयोगः स्पष्ट एवेति शेखरः संगच्छते न चैवमपि ह्रस्वनद्येति सूत्रे कस्यामो ग्रहणं राम.
मित्याशङ्क्यं कास्तात्ययेति विहितस्य सानुबन्धकत्वादि स्तुस्त्रात्कातन्त्राम्नोमित्वमदन्तत्वादथवा फलाभावाद्गुलूपार्थं २९

पत्तिरित्युक्तं॰ तत्र विसर्जनीयस्येत्यनुवर्त्य तच्चावर्त्य उत्तरसूत्रे ४ क॰ ५ पाविति प्रथमान्तसाहचर्येण प्रथमया विपरिणाम्य चाद्विसर्ग इत्य
र्थः॰ यासुट्परस्मैपदेषूदात्तो ङिच्च॰ अत्र ङिच्चेति विहाय यड्यासुट्परस्मैपदेषूदात्त इत्येव तु न सूत्रितं॰ तथा सति किदाशिषीत्यातिदेशि
ककित्वस्य इज्यादित्यादौ संप्रसारणसंपादनेन चारितार्थ्याज्ज्ञागर्यादित्यादावौपदेशिकस्य ङित्वस्य विशेषविहितेनाति
देशिकेन कित्वेन बाधस्य वक्तुमशक्यत्वात्॰ ततश्च जागृ ओ वीति सूत्रेण गुणो न स्यात्॰ विचिण्णल्ङिन्नन्यस्मिन्नङिवि
षये प्रतिषेधविषये च ——— ति सिद्धान्तान्मतमनुनायं दोषः॰ आतिदेशिकेन विशेषविहितेन कित्वेनातिदेशिकस्य
ङित्वस्य वा धोवक्तुमशक्यत्वे॰ न चैवमपि क्यासुटि कृते किदाशिषीति सूत्रमास्त्विति महल्लाघवमिति वाच्यं॰ विधिलिङ्य
पि वच्याज्ज्ञागर्यादित्यादौ संप्रसारणगुणौ स्यातामित्यलं बहुना ५९ डाबुभाभ्यामन्यतरस्यां॰ अत्र सूत्रे मनोरमायामन्य
तरस्यामिति योगं विभज्य बहुधीवरीत्यादिरूपससाध्य बहुव्रीहौ वेति वचनमुक्तं योगविभागसिद्धं॰ ननु पाणिनिकृतं सू
त्रमित्युक्ता भाष्ये तु सूत्रभङ्गेन समाहितं॰ तद्यथा ऽ नो बहुव्रीहेरित्यस्यानन्तरं उपधालोपिनो वे तिसूत्रमस्तु॰ उन उपधे
ति प्रदेशान्तरस्थं डाप्सूत्रे ऽन्यतरस्यांग्रहणं मास्त्विति चोक्तम्॰ अत्र वेत्यस्यानन्तरं मनोरमायां प्रतीकमुपादाय अनो बहुव्रीहेर्ङीबु
भाभ्यामनुपसर्जनादुपधालोपिनो वेति पाठ्यमिति भावः यथाश्रुते ऽनुपसर्जनादित्यस्य संबन्धो दुर्घटः॰ अत एव बहुदामा निपु

पू·पं·
२०

ह्रासेतिवार्तिकंसार्थकमतोनवार्त्तिकवैयर्थ्यमित्यपरमपिदूषणं· णिलोपेयथाजात्याश्रयणेनथाहूस्वेपिजात्याश्रयणाद
वीवद्दितिसिद्धम्· तथाचसूत्रेएवाचःस्थानिकइत्यर्थेसर्वेष्टसिद्धिरितिणिलोपादेरित्यत्रानकुणवहुव्रीहिणाटिलोपइ
त्यर्थाश्रयणेपिनिर्वाहः अत्राकलयन्तुतत्त्वंनागेशभट्टानुयायिनः पिपठीरितिप्रतीकमुपादायहनेरल्लोपोनस्था
निवत्· पूर्वत्रासिद्धेतन्निषेधातिशेखरोक्तंनपदान्तसूत्रेपदेऽन्तइतिसप्तमीसमासव्याख्यातिपरभाष्यप्रामाण्यात्पूर्वत्रा
सिद्धइत्येतत्यद्वचरमाननतिरिक्तत्रैपादिकग्रहणे कृत्वेस्थानिवत्त्वंभवत्येवेतिशेखरेणसहविरुद्धम्· तत्रसमाधानेवा
लम्भट्टैरुक्तं· समाननिमित्तकस्यैवत्रैपादिकस्यग्रहणेनादोषात्· अत्रार्थेप्रमाणंनदृश्यतेभाष्यादिकंकेवलविरोध
परिहारायैवयमुक्तिःसमाधानमत्रविभावयन्तुसुधियः ५७ शर्परेविसर्जनीयः अत्रमनोरमायांशर्परेनेत्युक्तेअनं
तरत्वात्सत्वस्यैवबाधकंस्यान्नत्व कपयोस्तथाचवासःक्षौमंमद्भिःप्सातमित्यत्रदोहुर्वोणविन्युक्तम्· इदंचनसंभ
वति·कुप्वोरितिसूत्रंशर्परेएतद्विषयेःकःपसंपादनेनचरितार्थम्·कःकरोतीत्यादावपिजिह्वामूलीयादिप्रसङ्गे·सत्व
दृष्ट्याःकःपयोरसिद्धत्वात्सत्वंस्यादित्याशङ्क्यशर्परेनेत्यनुवर्त्यशर्परेकवर्गपवर्गचःकःपौनेत्यर्थेप्रकृतेदोषाभा राम
वः किंचशाब्दबलेनविसर्जनीयस्यसोशर्परेइतिसूत्रितेऽपिकुप्वोरितिसूत्रेशर्षरइत्यनुवृत्त्यातयोरशर्परेप्रवृत्त्याचाहि २०

मर्थ्यो च्छ्रासेोधात्वधिकारोक्तत्वाभावेपिसार्वधातुकसंज्ञाभवतीतिभवतेरङ्स्यादिनिर्देशेः कर्त्रर्थत्वाभावेपिक्वित्सार्वधा
तुकेशप्भवतीतिज्ञापनात्. तेननिरर्थकश्यासिपरेशप्सिद्धः एवंचजागर्यादित्यादावपिविहितेनकित्त्वेनातिदेशि।
कस्यसार्वधातुकमपिदितिङित्वस्यवाधेङिङ्न्नप्रतिषेधविषयत्वाद्गुणः सिद्धः समाधिमत्राकलयन्नुसूक्ष्मदर्शिनः ५५
अस्त्रोपोनः अत्रानोनशितिसूत्रमस्तु. नचप्रियाष्टइत्यादावस्त्रोपेतस्यसंयोगादिलोपलत्वेष्विति वार्तिकेनस्था
निवद्भावात्स्वत्वंनं नशादेशत्वऽस्लादेशात्त्वाभावात्स्वत्वस्यादितिवाच्यं. प्रियाष्टशब्देपरेतुमतशेखरपर्यालोच
नेनतदनभिधानस्यैवलाभा तु. विभावयन्तुसमाधानंज्ञातभाष्यगूढाभिसंधयः ५६ अचः परस्मिन्पूर्वविधौ अच
एवादेशइत्यर्थः तेनमरुत्तमाचष्टेमारयतीत्यादौनस्थानिवद्भावः अत्रसूत्रेयोऽचस्थानिकोनतुसूत्रेउपात्तावू. ।
स्थानिकइत्यर्थः तेनणिजादेरनेनस्थानिवत्त्वम्. अतएवचङ्परनिर्ह्रासइतिस्थानिवत्त्वनिषेधः वदितवन्तम्प्रे
रितद्वीवदितिसिद्ध्यर्थंसार्थकइत्युक्तमत्रशेखरेजुहुतइतिप्रतीकमुपादायस्त्राः स्थानिवत्त्वेनतमादायनगुणः।
अपरनिमित्तकत्वादजादेशत्वाभावाच्चेतितेनैवोक्तं. इदंपरस्परविरुद्धं. णिलोपादिस्थलेऽनुत्पत्तेरेवान्वाख्यानेपिवारि
अरव्यद्वीवरदित्यादौटेरितिसूत्रेऽपिस्थानिवत्त्वेनोपात्ताचः स्थानिकसत्त्वात्प्राप्तस्थानिवत्त्वप्रतिषेधकंचङ्परनि

पू.प. कोरित्यत्र नुक्ग्रहणो न तु किं अन्तरङ्गपरिभाषाया अप्रवृत्तिरतोऽनियमे रूपद्वयं· किंचात्र प्राचीनमतेऽन्तरंगपरिभा
१९ षयासिद्धत्वे वा एकरूपमेव हि ग्रामणीकलशौ इत्येकं· घिपदे लक्षणास्वीकारे तदभावे संप्रति घित्वाभावादनियमे रूप
द्वयं स्यात्· तद्धि घित्वे कर्त्तव्ये उत्तरपदनिमित्तकह्रस्वस्यासिद्धत्वे घित्वस्य सत्त्व मानत्वाभावात्· द्वन्द्वे घि इत्यस्याप्रवृ।
त्तौ रूपद्वयम्· अथवा लक्षणहेत्वोः क्रियायाः इति निर्देशेन द्वन्द्वे घीत्यस्यानित्यत्वमप्यवश्यं वक्तव्यं इत्थं सति दण्डद
त्तौ दत्तदण्डिनाविति रूपद्वयसिद्धि निष्प्रत्यूहा इति समाधानं विदांकुर्वन्नुक्ततद्बुद्ध्यः पुष्यासु इट् परस्मैपदे वृद्धत्तो ङि· च्व·
अत्र श्यास् परस्मैपदे ष्विस्येवास्तु· पदद्वयं त्याज्यं अत्र सूत्रे लिङाधातोराक्षेपेणापि कृते ष्यास निरवकाशस्तेन श
बाधकः श्यास पूर्वं प्रविशने पश्चादुत्सर्गोऽपि भवति· आक्षिप्तस्य शाब्दबोधेऽन्वये तु सत्यपि संभव इति न्यायस्यानि
त्यत्वेन· सत्यपि संभवस्थाने यत्र बाधस्तत्र क्वचिदुत्सर्गः प्रवर्त्तन्ते· तेन प्रकृते ष्यासि कृते शब्भवति· तदनित्यत्वे ज्ञा।
पकः सोचीति निर्देशः अन्यथा त्यदाद्यत्वाप्राप्तियोग्येऽचारितार्थ्यम्· अत्वे कृतेऽपि सत्वं संभवति अंतः सत्वं त्यदाद्य।
त्वापवादकं· तद्विषयेऽत्वप्राप्त्यासद् इति स्याद् अतो ज्ञापकोऽयं तदनित्यत्वे· किदाशिषीत्यस्यानन्तरं लिङार्द्धधातुकं कर्त्त राम·
व्यं· पूर्वसूत्रात्पदद्वयमनुवर्त्य आशिषि लिङि परो यः स आर्द्धधातुकसंज्ञः स्यादिति आर्द्धधातुकसंज्ञाविधानसा ४ १ १९

सनपुंसकमित्यत्रतच्छब्देनैतद्विहितसमाहारद्वन्द्वपरामर्शः तत्रचयघञ्चवडवावितिपरत्वात्स्यान्तदैतद्विहितसमाहारद्वन्द्व
विषयकम्· सनपुंसकमित्यचरितार्थस्यादतः समाहारद्वन्द्वेनपुंसकह्रस्वत्वे अश्ववडवपूर्वेतिनिर्देशोपपत्तिरितरेतरयोगेसा
हित्यस्यविशेष्यत्वेवर्त्तिपदार्थस्यप्रकारत्वेप्रत्ययग्रहणपरिभाषयातदादिनियमेपि आवन्तात्परस्यांगसंज्ञानिमित्तस्यः औङः
शी आवन्तात्परस्यशीस्यर्थेवाश्यादेशोदुर्वारः प्रकृते अत एव दिक्संख्येत्यादिनिर्देशः खट्वया अई अईखट्वेत्यादिलौकि
कप्रयोगाश्चसंगच्छन्ते अत्रसमाधानंव्यूहनीयं· ५३ नलोपःसुप्स्वरसंज्ञातुग्विधिषुकृति· अत्रसूत्रेशेखरकृतोक्तम्· संज्ञा
यां· दत्तदण्डिनौ दंडिदत्तौ· अत्रनलोपेदण्डिन्शब्दस्यघित्वेनपूर्वनिपातापत्तिरिष्यतेत्युन्नेयं· असिद्धत्वेनतुघित्वाभा
वान्नसिध्यति· नचपूर्वनिपातेनलोपेचपूर्वनिपातइत्ययुक्तम्· यस्यपूर्वपदस्यघित्वंभावितत्पूर्वमेवप्रयोक्तव्यमित्यर्थे
नन्नदोषइतितुनद्वन्द्वेघीत्यत्रघिपदस्यभाविघित्वेलक्षणायांमानाभावेनसंप्रतिघिसंज्ञकंपूर्वंप्रयोक्तव्यमित्यर्थेसंप्रतिद
ण्डिन्नित्यस्यघित्वाभावादनियमेनरूपद्वयसिद्धौप्रकृतेसंज्ञाग्रहणंत्याज्यं· ननुलाक्षणिकघिपदानंगीकारेहरिच्छ
त्रेइत्येकमेवतत्रलक्षणास्वीकारेः त्रेहरिशब्दस्यभाविनातुकाइकारान्तत्वाभावेनघित्वस्यसंपत्स्यमानत्वाभावा
दनियमः सिध्यति· तथाचहरिच्छत्रेछत्रहरीइतिद्वयं· नत्रान्तरंगेघित्वेतुकोःसिद्धत्वाद्धरिच्छत्रेइत्येकमेव· षत्वतु ५

पू·प· मितिपरिभाषयासप्तमीवाच्यप्रत्ययान्तार्थोङ्गीक्रियतेनेतत्रचपूर्वस्यस्थानेकार्याभावात्सप्तमीत्वाच्चाप्रवृत्त्यानदोषः अत्रन्यासेदोष
१८ पिद्धिःप्रत्ययमारभ्यसुपःपकारेणप्रत्याहारमाश्रित्यङि·पिनिर्दिष्टेपूर्वस्येतिन्यासः सुवचः ५२ अदसऔसुलोपश्च· अदसःसो
डौइतिनसूत्रितं·टिलोपेकृतेनित्यत्वात्सत्वंबाधित्वात्यदाद्यत्वेऽसावित्यसिद्धेरितिशेखरकृतोक्तम· तदसङ्गतंतथाहिडौआदेशस्त्य
दाद्यत्वापवादःसत्यपिसंभवेइतिन्यायेनएवंचटिलोपापेक्षयापरत्वात्सत्वेपुनःप्रसंगविज्ञानाट्टिलोपेअसोसिद्धिः सकृद्गति
न्यायस्वीकारेतुटिलोपेनित्यत्वात्कृतेनदोषःतदोरितिसूत्रेसकृद्गतिन्यायेनअदसइतिविभज्यसत्वविधानाकनियमेनभाष्येऽ
नन्यग्रहणप्रत्याख्यानेनसत्वसिद्ध्याऽदोषात्· अदसःसोर्लोपइत्येवास्तु·नचासुकोऽस्त्रीत्यादौप्रत्ययस्यादितीत्वप्रसङ्गःडित्व
सामर्थ्यात्पूर्ववृद्धौअदन्तत्वाभावाट्टापोऽप्रसक्तेष्टायिअसिद्धत्वंणत्वसामर्थ्यादेवन ५३ पूर्ववदश्ववडवौद्विवचनमतंत्र
मितिप्रतीकमुपादायोक्तं· अतएवपूर्ववदितिचरितार्थमन्यथाऽश्ववडवावितिनिपातनात्सिद्धेःकिन्तेनः समुदायस्यपूर्व
वृःस्त्रिलिंगत्वेपिउत्तरपदाट्टापोनिवृत्तिरश्ववडवपूर्वापराधरोत्तराणामितिनिर्देशात् अश्ववडवावितिसमुदायस्यावनत्वा राम·
भावाच्चोभावाप्राप्त्यावृद्ध्यासिद्धं· अश्ववडवाशब्दार्थः पूर्ववल्लिंगलभतेइत्यर्थेपुंस्त्वविधानमनुप्रयोगेचरितार्थं। १८
मू· सुंदरावश्ववडवावित्युक्तंउद्देश्यतावच्छेदकाक्रान्तत्वेनस्वस्मिन्स्वप्रवृत्तिरितिन्यायेनैवात्रसमाहारद्वन्द्वेकृते

कृत्वं · यथाश्रुते तु स्यान्स्यादिति मनोरमाग्रंथः एतदुपरि इयमाशंका प्रातिपदिकग्रहणे लिंगविशिष्टस्यापि ग्रहणमिति प
रिभाषया मृडानीहिमानीत्यादि प्रातिपदिकं · तस्माच्च पुंयोगादीनां नियतभावेन कथं प्रथमायाअनुपपत्तिः अत्र शब्दरत्न
ग्रन्थः प्रवृत्तिनिमित्तं तदाश्रयश्च प्रातिपदिकार्थः तदपेक्षया लिंगमात्रमधिकं यत्र भासते · तत्र प्रथमेति वाक्यार्थः मृडानी
त्यादौ न केवलं लिंगमेवाधिकं भासते किन्तु पुंयोगोपि · एवं च प्रथमा न स्यादिति तदाशयः तदपि चिन्त्यमेव · मनोरमाका
रमते प्रवृत्तिनिमित्त तदाश्रयस्या प्राति पदिकार्थत्वादिति विभावनीयम् · ४६ नमुने · अत्र ननेइत्येवास्तु · ४७ ना
मि · अत्र नुटीत्येवास्तु · यत्र नुट् दोष आयाति तत्रागमान्तरकरणे न परिहरणीयः ४८ अदर्शनं लोपः अत्र अदर्शना
मित्येवास्तु · तस्य लोप इति सूत्रं मास्तु · बहुवचने झल्येदित्यत्र · बहुवचने स्येदिति सुवचं असुडाकमित्यपि तथा ४९ पदा
न्ताद्वा · विशेष्यविशेषणाभावेनान्तलब्धेः न्तग्रहणं पदाविधित्वबोधनद्वारा समर्थपरिभाषानुपस्थित्यर्थम् · तेन तिष्ठ
तु कुमारी च्छत्रं हरदेवदत्तेत्यादौ न विकल्पस्तुक इत्यत्र शेखरे उक्तं तदयुक्तम् · युष्मच्छब्दप्रकरणस्य ओदनं पचन वा
मविश्चमतीति प्रतीकमुपादायाग्रे पदुक्तं शेखरकृता समर्थपरिभाषा त्वत्र न प्रवर्तते तस्या एकार्थीभावविषयत्वादिति शे
खरविरोधात् · अत्र विरोधं परिहरन्तु विचक्षणाः ५० तस्मिन्निति निर्दिष्टे पूर्वस्य · अत्र सप्तमीनिर्दिष्ट इति न सूत्रितम्
...पश्चाज्जनेड इत्यादौ सप्तम्यन्ते परे इत्यर्थोपत्त्या जायते इति जोग्रामे देवदत्त इत्यादावनिष्टापत्तेः न च स्वरूप

पृ.प. लेऽस्यतु समासरूपप्रातिपदिकान्तनकारस्य न चेभवतीतितदर्थः अतएवगार्गभगिनीत्यादौनणत्वम्· परिभाषासत्त्वेमाधवपत्नी॥
१० स्यत्रपूर्वेङीबनुत्पत्तिः ततःसुबुत्पत्तिः ततःसमासइतिनकारस्यसमासरूपप्रातिपदिकान्तत्वाभावादित्येकदेशफलम् ४५ अर्थ
वद्ग्रहणसोनानर्थकस्य· अत्रचवश्चेतिसूत्रेराजेः पृथग्भ्राजिग्रहणंज्ञापकेमितिमनोरमादिग्रन्थेदीक्षितैरुक्तं· तदुपरिश
ब्दरत्नग्रन्थेतद्विपरीतंभट्टैरुक्तम्· व्रश्चादिसाहचर्येणधातुसंज्ञकस्यैवराजेर्ग्रहणं एवंचभ्राजन्तर्गतस्यराजेर्धातुत्वाभावात्· ॥
नषत्वसिद्धिरितिज्ञापकत्वमयुक्तम्· अत्रेयमाशंका यद्यत्रसाहचर्यपरिभाषाप्रवृत्तिरिष्टा· तर्हिशकारछकारघिया।
पिसाप्रवर्तेत। एवंचशकारान्तस्यछकारान्तस्यधातोरेवषः स्यात्· तदानिशाशब्दस्यनिशादेशेनिड्भ्यांनिड्भिरित्यादौ
षत्वानापत्तिः तस्मान्मनोरमोक्तंसम्यगेव· वस्तुतःपरिभाषाप्रवृत्तावमुंदोषंविभाव्यैवकिंचेत्यादिनायुक्त्यन्तरमुक्तम्·न
चऋकारानुबन्धस्यराजेर्ग्रहणंनस्यात्· तत्रऋकारस्यसमुदायानुबंधकत्वात्· समुदायानुबन्धस्यावयवानुबन्धत्वा
भावात्· इतिनकाप्यनुपपत्तिः अथवाप्रथमोपात्तत्वात्· व्रश्चादिविषयेएवपरिभाषाप्रवृत्तिःशकारछकारविषयेपिप्रवृ
त्तौनकिंचिद्दूषणं· निड्भ्यांनिड्भिरित्यादीनामनिष्टत्वात्· अर्थंप्रथमेत्येवसारम्· तत्रकस्यार्थइतिजिज्ञासायांयस्मात्त्वादिवि। राम·
धिस्तदर्थेइतिलभ्यते· एवंचमृडानीहिमानीत्यादौपुंयोगमहत्त्वादेरपिडयत्नानियमभावेनप्रथमासिद्ध्यतीत्यपरमनु ॥ १०

डिदितिन्अर्थः एवंचटेरितिटिलोपः अनुवृत्त्यर्थमपिनलोपग्रहणम्· एतदग्रेगोतोणिदित्यादिदर्शनात्· अत्रसमाधानंमृग्य
म् ४५ गतिकारकोपपदानांकृद्भिः सहसमासवचनंप्राक्सुबुत्पत्तेः तेनव्याघ्रीकच्छपीत्यादौसुबुत्पत्तेः प्राक्समासेविशि
ष्टस्यजातिवाचकत्वेनजातेरस्त्रीविषयादितिङीष्· अन्यथास्वार्थादीनांक्रमेणैवोपस्थितौमत्यांलिंगबोधकेटापिततःसु
बुत्पत्तौततःसमासेऽदन्तत्वाभावान्ङीष्नस्यात्· अत्रायंपूर्वपक्षः इयंचपरिभाषामास्तु· उपसंजनिष्यमाणनिमित्तोप्य
पवाद उपसंजातनिमित्तमप्युत्सर्गंबाधन्तेइत्यनयादधतीत्यादौयथापूर्वमन्तोनभवत्येवंप्रकृतेऽपिटापूनर्भविष्यति·न
चादभ्यस्तादित्यस्यानवकाशत्वमितिवाच्यं· जक्षतीत्यादौचारितार्थ्यात्· नचगतिकारकेतिपरिभाषाभावेकुम्भकारे
पोनस्यात्· सुबन्तेनसमासेकारशब्दान्ङीष्स्त्रीभ्योढगितिकारीशब्दादेवस्यात्· एवंचकुम्भकारेऽपइत्येवस्यादितिवा
च्यं·स्त्रीभ्योढगित्यस्यस्त्रीप्रत्ययान्ताड्ढगितिनार्थः किन्तुस्त्रीवाचकाड्ढगित्यर्थः अतएवमातृष्वसुर्ढकिटिलोपवचनंच
मित्याहुः· अन्यथास्त्रीप्रत्ययान्तत्वाभावाड्ढकोदुर्लभत्वेनतदर्थंस्यात्· अतएवऋष्यन्धकेतिसूत्रेभाष्येजम्बूशब्दस्यतु
ष्याज्जातिवाचकः तस्माड्ढ्निप्राप्तेढच्चइति स्त्रीभ्योढगितिढकिचप्राप्तेतत्रढक्पूर्वविप्रतिषेधेनेत्युक्तं· तदसंगतंस्यात्·
जम्बूशब्दस्यस्त्रीप्रत्ययान्तत्वाभावात्· हलन्तेभ्यस्तुनढक्· अनभिधानाच्छिवादिपाठाद्वा· वस्तुतस्तुमाषवपनीत्यादौप

पू॰ प॰ २६ वारणोऽन्यथमेवोपधाग्रहणं क्रियमाणेऽप्युपधाग्रहणे सान्तमहतः संयोगस्येति सूत्रेऽङ्गाधिकारे प्रत्ययोऽस्त्येव ताकाङ्क्षतया
स र्वेनामस्थानिमङ्ग· स्यैव विशेषणम्· एवं च हंसशिंशांसीत्यत्र उभयोर्दीर्घप्राप्तौ परिभाषयैव वारणं उपधाग्रहणं चात्र पूर्वेणात्राप
लक्षणम्· पारिभाषिक्या असंभवादिति परिभाषयैव सर्वत्र न कार्यम्· अत्रोच्यते· अनन्त्यविकारे इति परिभाषायामुदात्तनि
र्देशः क्रियते· प्रतिविधेयं चोदात्तनिर्देशादिति परिभाषाशेषभाष्ये उक्तम्· यत्रोदात्तनिर्देशस्तत्रैवेयं प्रवर्तते· तत्फलं तु
तिङः तिङ्· इत्यत्र तस्या अप्रवृत्तिः तेन देवदत्तो भवतीत्यादौ सर्वस्यानुदात्तत्वसिद्धिः अन्यथा वकारात्परस्यैव स्यात्· एवं च
प्रकृते उदात्तनिर्देशाभावात्· परिभाषाऽप्रवृत्तौ पकारात्परस्य दीर्घः स्यादेव एतद्व्यावृत्त्यर्थमुपधाग्रहणमिति शेखराश
यः वस्तुतस्तु अप्तृन्तृच् इत्यत्रानुवृत्त्यर्थमुपधाग्रहणम्· अन्यथा धातारौ कर्तारौ इत्यादौ गुणं बाधित्वा येन नाप्राप्तिन्या
येन पूर्वमेव दीर्घः स्यात्· इन्हन्नित्यत्राप्यनुवृत्त्यर्थमुपधाग्रहणं· तेनोपधादीर्घस्यैवायं नियमः तेन वृत्रहायते इत्यत्रा
क्रान्तौ वर्तिदीर्घो भवत्येव· उपधाग्रहणानुवृत्तौ सोऽपि नियम्येत इति विभाव्यं नव्यतत्त्वज्ञैः ४२ न संयोगाद्वमन्तात्· अत्र।
नहलो वमादित्येव सूत्रमस्तु· हलः परौ यौ वकारमकारौ ततः परस्यानोऽकारस्य लोपो न स्यादित्यर्थेन कुत्राप्यनुपपत्तिः समा राम २६
धानं मृग्यमिति· तन्न· भाष्यानुक्तत्वादप्रमाणमेतत्· ४३ भस्य टेर्लोपः नन्वत्र भाड्डित्येव सूत्रमस्तु· भसंज्ञकान्त्यजादेः परेऽप्यः प्र

मि तिवाच्यं· हेमपरेइतिसूत्रेणामकारविधानानर्थक्यापत्तेः तद्धि मोनुस्वारइतिप्राप्तावनुस्वारबाधनार्थं· विपरीतनियमेतुग्रा
नुस्वारप्राप्तिरेवनेतिसमाधानंविभावयन्तुसुधियः३९ लोटोलङ्वत्· नन्विदंसूत्रमास्तु लोटःस्थानेङ्लोटइत्येवास्तु· तेनङित्वात्ता
मादय्यःटित्वाहितस्त्रात्मनेपदानामित्येत्वसिद्धिरितिचेन्न· ङ्लोटकरणेनैवसिद्धेलोटोलङ्वदितिसूत्रमातिदेशिकमनित्यमि
तिज्ञापनार्थं· तेनजुहुतुविदन्तुइत्यत्रसिजभ्यस्तेतितिजुस्न· विदोलटोवेत्यतोवेत्यनुवर्त्यव्यवस्थितविभाषाश्रयणेनजु
स्त्वारणंतुनयुक्तम्· भाष्येव्यवस्थितविभाषास्वसापाठात् ४० स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्· अत्रसूत्रेउपसर्जनात्
किम्· सुशिखेतिप्रत्युदाहरणंमूलेउक्तं· तदयुक्तं· शोभनाशिखेतिसमासेऽनरङ्गत्वाट्टापिअदन्तत्वाभावान्ङीषोऽप्राप्तेः।
अतएवशेखरेसुशिखेतिप्रक्षिप्तःपाठः शिखेत्येवप्रत्युदाहरणंबोध्यंइत्युक्तं· तदपिनयुक्तं· अस्वाङ्गपूर्वपदाद्वेत्यतोत्रा
स्वांगपूर्वपदाद्वित्यनुवर्तते तेनकरमखाकल्याणपाणिपादेत्यत्रनङीष्· अत्रहिस्वाङ्गपूर्वपदंयत्कल्याणेति· ततःपरंपा
णिपादेतिनत्स्वाङ्गवाचकत्वादितिविभावनीयम् ४१ लोपधाया· अत्रपञ्चानामित्यत्रपकारात्परस्यदीर्घवारणायउपधा।
ग्रहणमितिशेखरेउक्तम्· तदयुक्तम्· उपधाग्रहणाभावेपञ्चानामित्यत्रोभयोर्दीर्घप्राप्तावन्त्यविकारेऽनन्त्यसदेशस्य
[illegible] अनन्त्यादेश्यकेकार्येऽन्त्यसदेशानन्त्यसदेशयोर्युगपत्प्राप्तोअनन्त्यसदेशस्यभवतीतितदर्थः अनयैवपञ्चाना

पू·प· द्रव्यं·वाचकः। चलिंगानामद्रव्यो गुणाः स्मृतः आम्व्याख्यानादर्थो वोढव्यः भाष्ये हि गुणवचनाद्या द्युदात्तार्थम्·गुणवच
१५ नान्ङीषु कर्तव्यः स्वस्त्रीणी ब्राह्मणी न पाण्डुरीयं ब्राह्मणी वस्त्रीति प्रतीके सुपादायकैयटस्त्वाह·चान्येतिदि सतोऽतिवर्त्ते
मानिमृत्स्विहीति वसुशब्दस्याद्युदात्तो व्युत्पादितः तस्मान्ङीपि मत्याकारोनुदात्तो भवति ङीषि तूदात्तः अत्र नोदात्तत्सु
ङीपृङीषोर्विशेषाभावः उदात्तयणपूर्वादिति ङीप्·उदात्तत्वविधानादिति कैयटव्याख्या·ततश्च भाष्यकैयटानुक्तत्वे
न दुर्बुद्धिकल्पनमात्रमसंगतमेवेति बोध्यम् ३७ हलि सर्वेषाम्·अत्र सूत्रे हलि किम्· देवापिहेति मूले उक्तं·तदसंग।
तमिव भाति·लोपः शाकल्यस्येत्येतद्विषये देवायिहेत्यादौ यदि नित्यो लोपः स्यात्तर्हि लोपः शाकल्यस्येति व्यर्थमेव स्या
त्·अत्रोच्यते·लोपः शाकल्यस्येति सूत्रेण अलघूच्चारणयोर्यवयोर्लोपः हलि सर्वेषामित्यनेन तु लघूच्चारणयोः तत्र
हल्ग्रहणाभावे लघुप्रयत्नयकारे देवापिहेत्यादौ लोपः स्यादिति तदाशयः ३८ मोनुस्वारः अत्र सूत्रे पदस्येति किम्·
गम्यते इति प्रत्युदाहरणं मूलोक्तमसंगतं· नश्चापदान्तस्येत्यत्र मस्यानुवृत्तौ नस्य मस्य चापदान्तस्यानुस्वार इत्या
र्थः इदं च नियमार्थं भविष्यति· अपदान्तस्य मस्य चेदनुस्वारस्तर्हि झल्येवेति गम्यते इत्यादौ नानुस्वारप्राप्तिः न च वि हि राम
परीतनियमः स्यात्·झलि अनुस्वारश्चेत्तर्हि अपदान्तस्यैव मस्य·हरिं सेवते इत्यादौ न स्यात्·सूत्रस्य तु हरिं नमतीत्यत्र·चारि १५

दिवचनादपिङीषु प्राप्नोति· आखुरित्यादाविति· एतच्चैको गुण इति सत्यविवरणम्· स त्वेद्रव्ये निविशते द्रव्यमाश्रयत इ
त्यर्थः पुनरपैति द्रव्यान्निवर्तत इत्यर्थः पुनश्च पृथग्जातिषु भिन्नजातीयेषु दृश्यते यः स गुण इत्यर्थः एतेन जातेर्गुणत्वं
निराकृतम्· जातिश्च द्रव्ये निविश्यमाना द्रव्यं न कदाचिज्जहाति· न च भिन्नजातीयानि द्रव्याण्यभिनिविशते· यद्यपि ग
वाश्वादिषु प्राणित्वमस्ति तथापि प्राणित्वेन तेषामेकजातीयत्वमेव· क्रियायास्तु पूर्वोक्तलक्षणयोगाद्गुणत्वं प्राप्नो।
ति· सापि हि द्रव्ये निविशते· कदाचिद्द्रव्यान्निवर्तते निष्क्रियं हि यं हि द्रव्यं कदाचिद्भवति कदाचित्सक्रियं· भिन्ना
नियानि द्रव्याण्याश्रयतीत्याह· आधेय इत्युत्पाद्यो यथा· घटादेः पाकजो रूपादिः अक्रियाजोऽनुत्पाद्यो यथाऽऽका
शादेर्महत्त्वादिः क्रिया तूत्पाद्यैवाननित्येति तस्माद्द्वैविध्याभावात्· गुणत्वाभावः एवं तु द्रव्यस्यापि गुणत्वं प्राप्नोति·
अवयविद्रव्यमवयवद्रव्येषु निविशते· समवायिकारणत्वयोगान्निष्क्रिये च विनाशात्ततोऽपैति· भिन्नजातीयेषु च हस्त।
पादादिषु दृश्यते· तद्द्विविधत्वं तन्नित्यानित्यभेदेन निरवयवस्य द्रव्यस्य परमाण्वादेर्नित्यत्वादवयविद्रव्यस्यानि
त्यत्वादित्यारेकायामाह· असत्त्वप्रकृतिः अद्रव्यस्वभाव इत्यर्थः अत्र पृथग्जातिष्वित्यसमासः समासे हि जात्यन्तात्स्वं।
रैः प्रसज्जेतेतरैराङ्क्षि· ध्वजाद्याधारेषु दृश्यमानजातिवद् दृश्यत इत्युच्यते अपर आह· उपेत्यन्यज्जहात्यन्यद् दृष्टो द्रव्यान्त

पू·प· स्यामितिच्छिङि ञ्यपोत्तमस्य विकल्पोदात्तत्वविधानात् तदभावेऽस्तु चित्स्वरः नच ञिप्रभृति पदमचकमदित्यस्योपलक्ष।
९४ णम्· अमकारात्पूर्वस्य लघोरकारस्य संभवादिति वाच्यं· मकारेणाव्यवधानादकारस्य गोरव्यवहितपूर्वत्वाभावात्· किंचा
चकमदित्यस्योपलक्षणत्वे ङि· स्वरूपविशेषाभावेन कमेर्णिङि· त्यस्यानन्तरमपादयोर्णित्यंतद्बाधनाय लुङि·चेति वदेत·
लुङि·परे कमेर्णिङि·ति तदर्थः अत्र सुधियो धिभावयन्तु उ॒ वोतो गुणवचनात्· अत्र उत: किंसुचिरिति मूले उक्तम्· अत्र
छ्रदिकारादक्तिन इति ङीषो विकल्पस्येष्टत्वेन शुक्लेति प्रत्युदाहरणं बोध्यमिति शेखरे उक्तम्· एतदप्ययुक्तम्· स्वरूसं
योगोपधान्नेति निषेधस्य जागरूकत्वात्· स्वरूसाहचर्येण संयोगोपधाच्छुकारान्न एवं गेहसन्ने इति शुक्लेति प्रत्युदा।
हरणं सम्यगेव। श्यामेत्यत्र तु न कश्चिद्विवादः अत्रोच्यते· शुक्ला वा श्यामा वा शुद्धा गुणवाचकाः गुणे शुक्लादयः पुं
सीति कोषात्स्त्रीत्वाभावान्न ङीप्टापौ भवतः उदंताद्गुणवं च नात्र कृते ङीषविधाने सूत्रस्वरसात्· शुद्धगुणवा
चकादेव प्रत्ययस्तथा च भाष्ये के गुणा इति प्रश्ने वोतो गुणवचनात्· गुणवचनादित्युच्यते· को गुणो नाम सत्वेनि एम·
विशतेपैति पृथग्जातिषु दृश्यते· आधेयश्चाक्रियाजश्च सोऽसत्वप्रकृतिर्गुणा इति· कैयटस्त्वाह· उत इति वचना ९४
द्वनग्रहणाच्चे ङोनग्रहणं· विशेषस्यापि तु गुणस्याग्रहणं प्राप्नोति· यथा पश्च गुणमाहरेदित्यत्र· न तश्च जात्या।

चतिङन्तस्य न लोप इत्यर्थकल्पनमयुक्तं निर्मूलत्वात् अतिङ इति पर्युदासापत्तौ तिङन्तभिन्नसदृशस्थलेन लोप इत्यर्थे
राजःसखेत्यादौ न लोपानापत्तेः तिङन्तसादृश्याभावात् सादृश्यमूलकाभेदप्रत्यभिज्ञं याबादोऽभ्रममात्रम् भ्वादिसूत्रे
क्रियावाचीति संज्ञिनिर्देशः धातुरिति संज्ञासंज्ञिभावेनान्वयः तदर्थं क्रियावाचिपदोपन्यासो वृत्तौ चेति बोध्यम् ३८ अचः पर
स्मिन्पूर्वविधौ अत्र सूत्रे शेखरेऽजादेशपदेन वस्तुतोऽजादेशःस्थानिवदित्यर्थः न त्वादेशविधायकेऽच उद्देश्यत्वमेवार्थः
तेन णिलोपादेःस्थानिवत्त्वसिद्धिः अत एव णायन्तास्मि चि अवीवदद्वीरमित्यादिसिद्ध्यर्थं चङ्परनिर्ह्रास इति निषेधः ।
सार्थकः जुहुत इत्यत्र श्लोः परनिमित्तत्वाभावेन शपः परनिमित्तत्वेन परम्परया लुक्कोपितत्वेन शप्त्वेन स्थानितयाऽ
जादेशत्वाभावेन स्थानिवत्त्वाभावात् शपमाश्रित्य न गुण इत्युक्तम् अत्र पूर्वापरविरोधः स्पष्ट एव वस्तुतोऽका
रस्यैव लुगिति स्थानिवद्भावो दुर्वारः ३९ सन्वल्लघुनि चङ्परेऽनग्लोपे अत्र सूत्रे शेखरे चङ्पर इति बहुव्रीहिः परग्रहण
सामर्थ्यात् तद्विशेष्यं च णिरेव न तु लघु अङ्गस्येत्यावर्त्याङ्गसंज्ञानिमित्तमित्यर्थात् अत एव श्विप्रभृतीनां न सन्व
त्त्वम् इदं चिन्त्यम् अशिश्रियत् अदुद्रुवदित्यत्र सन्वद्भावेऽपि न दोषः लघुत्वाभावेन न दीर्घः अकाराभावेन च नेत्त्वं ।
स्रवतीत्यादिसूत्रे श्रुणाभ्यामस्यावर्णस्य इत्वमपि न अवर्णपरधात्वक्षरपरत्वाभावात् नित्त्वरस्तु न प्रयोजनं चङ्यन्यत ।

पू.प. ऋमितिशब्द रूपमन्योऽनुपपन्नः अत्रैवद्वितीयः पूर्वपक्षः क्रियावाचिग्रहणाभावेवाकरोतिवाभवतीत्यादौवेत्यस्यधातु
१३ स्त्वनाधातुरितिपर्युदासेनाप्रातिपदिकत्वेसुबनुत्पत्तौपदत्वाभावात्तिङः तिङ इतिपदात्स्वरस्यनिघातोनस्यादितिशब्दर
त्नग्रंथः अत्रेदंबोध्यम् वाकरोतीत्यादौनदोषः अर्थवत्सूत्रेऽधातुग्रहणान्नकार्यं एवंचवाइत्यस्यधातुत्वेपिप्रातिपदिक
त्वंसिध्यत्येव नचाधातुग्रहणाभावेऽहन्नित्यत्रप्रातिपदिकत्वेसतिनलोपःस्यादितिवाच्यम् नलोपःप्रातिपदिकान्तस्ये
त्यत्रनलोपोतिङ इतिन्यासेनतद्वारणात् रामानित्यादौननलोपः नत्वविधानसामर्थ्यात् तस्मान्नुगितिन्यासेपिनुग्विधा
नसामर्थ्यान्नलोपोन अन्यथानलोपमेवविदध्यात् राजीयतीत्यादौतुनदोषः अस्या तिङ् निरूपितंयस्यपदत्वं तस्मिन्न
ख्रिनान्तस्यलोपइत्यर्थात् इतिखंडनग्रंथोयुक्तः तथाहि उपदेशावस्थायामेवसर्वत्रधातुत्वेराजानमागमयतीत्यादावेवंनर्व
र्तिनींविभक्तिमाश्रित्यनलोपापत्तिः सतिक्रियावाचकत्वेसर्वत्रधातुत्वंनयुक्तम् कार्यादिगणपठितत्वाभावेपिभ्वादिदश
गणीपठितत्वात् क्रियावाचित्वाच्चधातुत्वेनतद्व्यतिरिक्तवहिर्भूतस्ययावादेर्नधातुत्वं यावादिपरत्वेननिघातसिद्धिः राम·
अर्थवत्सूत्रेहिप्रशंसायांमतुपिकृतेएकार्थीभावेनप्रशस्तार्थवत्त्वाभावेनप्रातिपदिकत्वनिरासतात्पर्येणार्थवद्ग्रहणस्य १३
कृतार्थत्वात् भ्वादिसूत्रस्यभाष्यविरोधात् किंचनलोपविधायकेसूत्रे नलोपोतिङ इतिगुरुभूतत्वाभियुक्त्याऽप्रामाण्य

इतिपररूपापत्तेः आटोविधानसामर्थ्यात्तु न वहुश्रेयस्यामित्यादौ तु वृद्ध्या बाधनेन चारितार्थ्यात् आटश्चेत्यस्य तु न प्रवृत्तिः अत्र सूत्रे धा
तोरित्यपकर्षादिति शेखरग्रन्थः इणाधातौ शेखरे तु आटश्चेत्यस्य प्रत्याख्याने आदीनामप्याडागमे ऽतो गुणाइति पररूपमाश
ङ्क्य अतो गुणाइत्यस्यानन्तरं नाटइति न्यासः कार्यः आटः पररूपं नेत्यर्थः तेनाटीदित्यादौ पररूपं नेत्युक्तम् एवं च नाटइति न्या
सेनैव वहुश्रेयस्यैइत्यादावपि पररूपनिषेधे सिद्धे ऽत्राड्ढृकुमशक्यइति शेखरग्रन्थोऽसंगतः अत्रेत्थं विरोधपरिहारः आ
टश्चेति वृद्धिबाधकपररूपस्यैव बोधकं माटइति सूत्रं न तु वृद्धिरेचीति वृद्धिबाधकपररूपबाधकम् एवं च वहुश्रेयस्यैइत्या
दौ पररूपं स्यादेव तदर्थं तत्राकरणम् आटश्चेति चकारेण पुनर्वृद्धिविधानं बाधकबाधनार्थम् तेनायेन उस्योमाङि त्या
दिना रम्भणीयमिति भाष्यम् ३ भूवादयो धातवः अत्र सूत्रे क्रियावाचिनः किम् यः पश्यसीत्यादौ धातुत्वं स्यात् न च लक्षणप्रति
पदोक्तपरिभाषया न धातुत्वमिति वाच्यम् ग्वादौ लाक्षणिकानामप्यञ्चत्यादीनां दर्शनेन तद्विषये एतत्परिभाषाया अप्रवृत्तेः
नकारजावनुस्वारपञ्चमौ झलि धातुषु सकारजः शकारश्च तु षाट्टवर्गस्तवर्गजः इत्यभियुक्तोक्तेरिति मनोरमा शब्दरत्नग्रंथः अ
यं पूर्वपक्षः अञ्चत्यादीनां लाक्षणिकत्वेपि नात्र परिभाषाप्रवृत्तिः लाक्षणिकप्रतिपदोक्तोभयरूपत्वे हि तत्परिभाषाप्रवृत्तिः
अञ्चत्यादौ न तथा किंच धातुसंज्ञाहृष्यान्निपादीस्यत्वेन अनुस्वारादीनामसिद्धत्वेन प्रतिपदोक्तरूपमेव पश्यति धातुसंज्ञासू

पू.प. स्यकस्कादिगणेपाठः मातुःक्षपेत्यादौ ल्वेकादेशस्यासिद्धत्वान्नषत्वमितिमूलोक्तज्ञापकं नाकथ्यमिति· अत्रोच्य
१२ तेषैत्वतुकोरसिद्धइतिसूत्रेपदान्तपदाद्योरेकादेशोऽसिद्धइतिवार्त्तिकेनप्रक्तेऽसिद्धत्वाभावः तेनपरिजीषुपरिवीष्वित्यादौ षत्व।
सिद्धिः ज्याधातोर्ल्यप्त्र धातोश्चक्विपिग्रहिज्येतिसंप्रसारणे पूर्वरूपेहलइतिदीर्घे ततः सप्तमीवहुवचने इणःपरत्वात् षत्वम्·
अन्यथापूर्वरूपस्यासिद्धत्वादकारेणाव्यवधानान्नस्यात्· वृक्षेछत्रमित्यत्र तुग्न· अन्यथासप्तम्येकवचनेनसहैकादे।
शेम्यासिद्धत्वात्तुक्स्यादेव· वस्तुतस्तु· इग्यणः संप्रसारणमित्यत्र· संप्रसारणमित्येवसूत्रमस्तु· संप्रसारणाच्चेतिन
कार्यं· प्रकृत्यैकाजितिप्रकृतिभावात्· श्रावयतीत्यस्यासाधुत्वे श्वुनयतीत्यस्यैवप्रामाणिकत्वे डापू सूत्रस्थवहु।
म्नाइत्युदाहरणेसंप्रसारणाकरणेनचनकापिदोषः तदाषत्वेकर्त्तव्येपदान्तपदाद्योरेकादेशोऽसिद्धइतिनियमोन।
स्वीकार्यः एवंचभ्रातुष्पुत्रशब्दपाठोविध्यर्थएव कथंज्ञापकमितिसुधीभिश्चिन्तनीयम्· ३२ आडजादीनामन्वजादौ।
नां लुङ्· लङि· तिसूत्रेणाऽडेवास्तु· एवंचप्रकृतसूत्रंनारम्भणीयम्· आटश्चेत्यत्र अटश्चेत्येवसूत्रमस्तु· अस्वपोहस। राम·
न्नित्यत्र तु अड्गार्ग्यगालवयोरितिसिपोऽडागमेनदोषः अटश्चेत्यत्रधातोरित्यपकर्षणाद्धात्ववयवस्याटोविवृद्धि। १२
रित्यर्थः आरा नघाइत्यत्र तु अड्कुमशक्यः वहुश्रेयसे इत्यादौ वृद्धिरेचीतिवृद्धिंवाधित्वाऽतोगुणे हू· हू

नित्यमिति ज्ञापनार्थे सार्वधातुकग्रहणम्· क्त्वोऽर्थे ग्रहणं तु शेखरे खण्डितम्· सुच इत्येव सिद्धान्तितम्· तेन सिजभ्यस्ते
त्यादौ पूर्वपरसाहचर्यमनादृत्य अभ्यस्तात्परस्य ङि· त्संबंधिनो मेर्जुस्· तेन भवन्तेर्यङ् लुगन्ताल्लुङि· अबोभुवुरिति· ददा
तेर्जौहोत्यादिकाल्लङि· अददुरिति सिद्धम्· अत्रोच्यते· तिङ् शिदार्द्धधातुकेषु· लाघवादित्येवास्तु· न तत्र दोषः शेषः तिङि शि
ति आर्द्धधातुके च परे इगन्ताङ्गस्य गुणः स्यादिति सूत्रार्थे सकलेष्टसिद्धिः अत्र समाधानं कुर्वन्तु नव्याः इदुदुपधस्य चाप्र
त्ययस्य· अत्र इदुद्भ्यां प्रकृतेरिति मुनेरभिप्रायः इदुद्भ्यां परस्य प्रकृत्यवयवस्य विसर्गस्य षत्वं विधीयते· इति सूत्रार्थः इ
दुतोरपि प्रकृतिसमवेतत्वेन प्रकृतिमेताभ्यां परस्य प्रकृत्यवयवस्य विसर्गस्य षत्वविधानेन कप्रकृतिप्रत्ययत्वसंबं
धः· तेनाविष्कृतं निष्प्रत्यूहाद्युदाहरणो वोध्यम्· तदन्यप्रकृत्यविहितप्रत्ययस्यानिकविसर्गस्य व्युदासः तेन कविभिः कृ
तमित्यादौ नास्य प्रवृत्तिः इमं सिद्धान्तमज्ञात्वा मूढो जल्पति· नन्वनेन सूत्रेण मातुः कृपेत्यादौ षत्वं स्यादित्यत आह एका
देशशास्त्रनिमित्तकस्य न षत्वं· एकादेशशास्त्रस्यनेति तदर्थः अत्र च ज्ञापकं कस्कादिगणे भ्रातुष्पुत्रशब्दस्य पाठः अ
न्यथा उदुपधत्वादेव तत्र षत्वस्य सिद्धत्वेन किं न तत्र पाठेन· अत्रायं पूर्वपक्षः भ्रातुष्पुत्रशब्दस्य पाठः सार्थकः तत्र हि इदुदु
पधस्येति षत्वे कर्त्तव्ये षत्वं नु कोः सिद्ध इत्येकादेशस्यासिद्धत्वादुदुपधत्वाभावादप्राप्तं षत्वमिति विध्यर्थम्· भ्रातुष्पुत्रश

ऽप्यसिद्धस्यत्यन्तलाघवान्ङादावन्निपूर्वरूपमित्यर्थे कोपिनदोषइतिविभाव्यंनव्यैः समः सुटि॰ अत्रमःसुटीतिन्यासोस्तु।
पू॰प॰ लाघवात्॰ अत्रसुटिपरेसमोमकारएवसंभवति॰ नान्यमकारततश्चनान्यदोषः संस्कर्त्तोदोसर्वत्रान्वाख्यानं सिद्धमिति
९१ कश्चित्॰ वस्तुतः सममुट्संस्कारइतिवाक्येत्वत्वापत्तेः किंचसुडित्यागमग्रहणमाहोस्वित्प्रत्याहारग्रहणं॰ संपरि।
भ्यांकरोतौभूषणेऽइतिसूत्रप्रामाण्यादागमग्रहणमितिचेदस्तु॰ मस्करशब्देदोषस्तस्मात्समः सुटीत्येवन्यासः साधुः
ः समः समिः अत्रसत्रेशेखरेसमोमिङितिनसूत्रितं॰ ङिच्चेतिपरिभाषाज्ञानकृतगौरवापत्तेः अत्ररूपासिद्धिरप्याया
ति॰ समोकच्यनेकाल्परिभाषयाविशिष्टस्यसम्यादेशेसम्पड्इतिरूपम॰ समोमिङितुङिचेतिपरिभाषयाऽन्त्यादेशेसकम्पङि
तिस्यात्॰ अत्रोच्यतेवहिर्भूतकुत्सादिनिमित्तकत्वेनाकचोवहिरङ्गत्वादादेशोत्तरमेवाकजिति॰ अथवा॰ एतत्सूत्र
भाष्यप्रामाण्येनात्राकचोनभिधानमेव ३० सार्वधातुकार्द्धधातुकयोः नन्वत्रपिदार्द्धधातुकयोरित्येवसूत्रमस्तु॰ पिति।
आर्द्धधातुकेचपरेइगन्तस्यगुणः स्यादितिसूत्रार्थः नचहरिष्विस्यादावतिप्र सङ्गइतिवाच्यं आर्द्धधातुकसाह
चर्याद्धातोर्विहितेपितिपरेइत्यर्थोव्याख्यानात्॰ अतएवलघुधृषु इत्यादावपिन॰ धातोःपितःपरत्वेपिधातुपदमु ९१
चार्यविहितत्वाभावात्॰ सार्वधातुकमपितइतितुकर्त्तव्यमेव॰ उष्टइत्यादौ ग्रहिज्येतिसंप्रसारणार्थम॰ वस्तुतस्तुसाहचर्य

षरिभाषया न दोष इति चेन्न रञ्जधातोरश्च राज्ञीदित्यादावनेकव्यवधाने वृद्धिर्न स्याद्वल्ग्रहणे तु वर्णग्रहणे जातिग्रहणमि
तिपरिभाषयाऽनेकव्यवहितेपि वृद्धिरित्यर्थः २६ नपदान्ताट्टोरनाम् । अत्र सूत्रे शेखरे विशेषणेन तदन्तविधौ सिद्धेऽन्तग्रहणं
स्पष्टार्थमित्युक्तम् । पदान्ताद्वेति सूत्रे च विशेषणेन तदन्तविधौ सिद्धेऽन्तग्रहणं पदविधित्ववारणाय । अन्यथा समर्थः प।
दविधिरिति परिभाषया सामर्थ्ये सत्व स्यात् । तिष्ठति कुमारीच्छत्रं देवदत्तेत्यादौ न स्यात् । इत्यन्तग्रहणस्य प्रयोजनमुक्तं ।
इदं च प्रयोजनं न पदान्तादित्यत्रापि संभवति । तिष्ठन्तु षट् सन्तो गच्छन्त्वित्यादौ निषेधो न स्यादिति पूर्वापरविरोधः । अत्रेत्थं परि
हार्यं न पदान्तादिति सूत्रेऽन्तग्रहणाभावेपि न समर्थपरिभाषोपस्थितिः अनामिति निषेधाल्लिङ्गात् अन्यथा एकपदे षस्मा।
मित्यत्र सामर्थ्याभावेन न पदान्तादिति निषेधाप्राप्तौ अनामित्यस्य वैयर्थ्यं स्यात् । समर्थपरिभाषदृष्ट्या त्रिपादीस्थस्य न
पदान्तादित्यस्यासिद्धत्वान्न तत्रोपस्थितिरिति न पूर्वापरविरोधः ७ ङसिङसोश्च । अत्र ङिःनोसीत्येव सिद्धे ङसिङसंग्रहणं स्पष्टा
र्थम् । अत्र ङिःत्यसीति वक्तव्ये ङिःनोसीति षष्ठ्यन्तपञ्चम्यन्तयोर्वासीति सप्तम्यन्तान्वये बीजाभावात् किंच गामत्तिक्रा
न्त इत्यर्थः तिगोशब्दान्ङेनान्ततत्पुरुषाट्टचि कृते तस्मान्ङसि विभक्तौ पूर्वे ङसकारयोः पररूपे पश्चादनेन पूर्वरूपापत्तौ
चातिगोरिति रूपापत्तेः सिद्धान्ते तु समस्तान्ङसि विधाने टचि अवादेशे एङो भावे पूर्वरूपशङ्काऽतिबोध्यम् । न स्मा।

पू.प तयाऽकः परत्वाभावः अथवा डोणादेशः प्रियतिसृ इत्यादौ रेणा बाधः अत्र समाधानं विभावनीयम् २४ हल्ङ्याब्भ्यो दीर्घात्सु
९० तिस्यपृक्तं हल् अत्र सूत्रे मनोरमायां हल्ङ्यापः सोरित्येव सूत्रयितुमुचितमित्युक्तं शब्दरत्नग्रन्थे तु सुपदं तिस्यारप्युपल।
क्षणम् तेनाविभाराज्यमिति सिद्धं तत्र हि अविभर्स् इति स्थिते सकारस्य संयोगान्तलोपः रोरीति रेफलोपः पश्चाद्राज्यशब्द
समभिव्याहारे ढ्रलोपे इति दीर्घः स न स्यात् संयोगान्तलोपस्यासिद्धत्वाद्रेफपरत्वाभावादित्युक्तं अयं शब्दरत्नग्रन्थः शेखरग्रन्थेन स
हविरुद्धः शेखरे तु अजर्घा इत्यादौ ढ्रलोपसूत्रस्थभाष्यप्रामाण्येन पूर्वत्रासिद्धमित्यत्र पूर्वे शब्दे · नढ्रलोपसूत्रग्रहणाबाधना।
दित्युक्तम् · अत्रेत्थं विरोधपरिहारः भाष्यप्रामाण्येन प्रयोगसाधुत्वम् मतेति प्रयत्ने प्रकृते तु त्तिसिग्रहणारूपो यत्न एवा
स्ति · नासूया कर्तव्या यत्रानुगमः क्रियते इति पङ्क्तिः विशतीति सूत्रभाष्यात् २५ वदव्रजहलन्तस्याचः अतो हलादेरित्य
स्यबाधनार्थं वदव्रज्योरुपादानम् · अन्यथा हलन्तत्वादेव सिद्धेः नन्वत्र सूत्रे हल्ग्रहणं किमर्थं · वदव्रज्योरचः इत्ये
वसूत्रमस्तु · वदव्रज्योर्यस्य कस्यचिदङ्गस्याचो वृद्धिः परस्मैपदे सिचीति सूत्रार्थः अजन्तस्याङ्गस्य वृद्धिरिति तु नार्थः इ राम
कारान्तादौ सिचि वृद्धिरिति वृद्धिविधानस्य वैयर्थ्यात् · अकारान्ते ऽचिकीर्षीद् अजिहीर्षीदित्यत्र तु परत्वादतो लोपेन बाधा ९०
त् · आकारान्ते ऽपासीद् अयासीदित्यादौ फलाभावान्न वृद्धिरिति भावः अनन्त्यस्य अपोपटद्वित्यत्रान्त्यविकारेऽन्त्यसदेशस्येति

त्वेतिकित्वविधानमनर्थकमितिवाच्यम्· सिसृक्षति दिदृक्षतीत्यत्र· सृजिदृशोर्झल्यमकितीत्यमागमनिवृत्तये कित्वस्य कर्तव्यतया
सामान्ययोगारम्भात्· समाधानं तु एवं सनि सृजिदृशोर्झल्यमकित्· सनिङ्को झलादमिरिति लघुनोपायेन सिद्धे हलन्ताच्चेति ज्ञापकं यु
क्तमेव २२ नलोपः प्रातिपदिकान्तस्य· अत्र पदस्येत्यधिकारस्तस्य प्रातिपदिकेति लुप्तषष्ठ्यन्तमभेदेन संबन्धेन विशेषणम्· न
त्वनेत्यस्य विशेषणं· नच येन विधिरित्यनेनैवान्तग्रहणालब्धे पुनरन्तग्रहणं व्यर्थमितिवाच्यम्· अन्तग्रहणेन क्वचित्पदस्येत्य
स्यावयवषष्ठीत्वं बोध्यम्· तेन मादुपधायाश्चेत्यत्र पदस्येत्यधिकारे मत्वन्तपदस्य मस्य व इति नार्थः किन्तु पदावयवस्य मन्तु
पामस्येत्यर्थः· अजन एव वृक्षवन्त इत्यादौ वत्वसिद्धिः· अन्यथा वृक्षवानित्यादावेव स्यादिति भावः २४ तस्माच्छसो नः पुंसि· ननु
शसो नुम्· पुंसीत्येव सूत्रमस्तु· अक इत्यनुवृत्त्या अकः परस्य शसो नुमित्यर्थः· एवं च शसः शकारस्यान्त्यावयवे वा नुमागमः प्रा
प्त्यात्पूर्वसवर्णदीर्घसंयोगान्तस्येति सलोपसिद्धम्· रामानित्यादि लिह इत्यादौ न दोषः शसोऽकः परत्वाभावात्· एतान् चतुरो
गाः पश्य मीत्यादावप्योकारस्यैकः परत्वाभावः औतोम्शसोरित्याकारेऽकः परस्य शसोऽभावादिति चेन्न· विश्वप इत्यादावा
तो धातोरित्यालोपे पितस्याचः परस्मिन्नित्यत्र पञ्चमीसमासपक्षे स्थानिवद्भावेनाकः परत्वान्नुमाप्तेः पंचमीसमासप्रस्ता।
स्याने नुम्प्रवृत्ते स्थानिवद्भावाभावेन दोषाभावः नन्वाष्टः इत्यत्रात्वकृते जश्शसोः शी आदेशे कृतेऽत्र नुम् स्यादिति वाच्यं· अकारस्य

पू·प· नशसददवादिगुणानामितिनिषेधादेत्वाभ्यासलोपौनस्तइतिविशेषोऽस्त्येव· थलिचसेटीतिसूत्रारम्भसामर्थ्यान्ननिषेधइ
९ तिचेन्न एवंचपेचिथेत्यत्रैववव्रतुरिथससरिथेत्यादावपिनिषेधानापत्तिः नशसददेतिसूत्रेगुणाग्रहणस्यनवैयर्थ्यम्·पप
रतुः पपरुरित्यादौऋच्छत्यृतामितिगुणेएत्वाभ्यासलोपनिवृत्त्याचारितार्थ्यात्· अत्रकेचिदित्थंसमाधानंकुर्वन्ति·।
केवलंदीर्घस्थानेगुणग्रहणस्यलब्धावकाशत्वेगुणग्रहणमपहायतत्स्थानेऋग्रहणमेवकुर्यात्· सामान्यग्रहणं
विजातीयस्थानिकोविजातीयोगुणोगृह्यतइति· गुणाग्रहणसामर्थ्यात्ससरिथववरिथेत्यादावपिनिषेधः पेचिथेति
तुनास्यविषयः विजातीयस्थानिकगुणाभावादितिकैयटग्रन्थेनकाप्यनुपपत्तिः अथवाथलिचसेडितिसूत्रोक्तभा
ष्योक्त्यानशसददेतिसूत्रेगुणग्रहणंगु णावयववपरं· गुणावयवोयोऽकारस्तस्यनिषेधः तच्चनननविथेत्यत्रैवसंभ
वतीत्यदोषः २९ क्ङितिचेतिसूत्रेक्ङितिपनिषेधेनन्निमित्तग्रहणंकर्त्तव्यंकिंप्रयोजनम्, उपधालोपस्य[illegible]पंथ·नेकर्त्तव्यं·
ज्ञापकात्प्रतिषेधोभविष्यति· यदयमिकोझलहलन्ताच्चेतिसनिकित्वंशास्तितज्ज्ञापयत्याचार्योभवत्युपधाभूत्त।
स्यापिनिषेधइतिभाष्यग्रन्थः अत्रकेचित्· हलन्ताच्चेतिसूत्रस्यनवैयर्थ्यंदित्सतीत्यत्रनलोपसंपादनेनकित्वस्यचारिता राम·
र्थ्यात्· तत्रहिदम्भधातुस्ततःसन्हलन्ताच्चेतिकित्वंतेननलोपः दित्सतीति· नचदम्भेःपरस्यैव[illegible]कित्वविधानेनसिद्धोसामान्येपि ९

तत्र भाष्ये उक्तं वृद्धेरेव स्थान्यादेशभाव इति। अन्यथा शब्दानित्यत्वप्रसङ्गात्· पुनश्च शङ्कितं· सति कर्मणि इत्यत्र वृद्धिप्र
सक्तौ क वृद्धिः क्रियेत· केनचित्कार्यं प्राप्नोति किं कारणम्· स्थानिवत्त्वात्· समाहितं च षष्ठीनि[र्दि]ष्टस्यादेशाः स्थानिवद्भवन्तीति
न स्थानिवद्भावः एवं प्रकृते न [षष्ठी]निर्दिष्टत्वाभावात् स्थानिवत्त्वाप्राप्तिः प्रत्ययलोपे प्रत्ययलक्षणमिति [सू]त्रप्रमार्थमुक्तेन न तु
द्विषये सर्वत्र स्थानिवत्त्वेन निर्वाहः एवं च त्रपुङ इत्यत्र तुकः प्राप्तिरेव नेति तत्र हि रोधः समाधानं तु [illegible] स्य मिनानुवर्त्त
ते। अपवादे उत्सर्गकृतं तु न भवति· यदयं शवपवादभूतान् कांश्चित् [illegible] न्नादीन् शितः करोति। अन्यथा स्थानिव
त्वेन निर्वाहात्· [illegible] हिल्लिश्चतुरि [illegible] कृत्वोऽर्थे· कृत्वोऽर्थे यो विसर्ग इति नार्थः चतुः शब्दे संभवात्· किन्तु हिरादीनामिति॥ आ
ह· वर्तमानानामेषामिति· इसुसोरिति सूत्रे रीत्या सुच इति सूत्रयितुमुचितं· सुजन्तस्य पदस्येत्यर्थादिति शेखरे उक्तम्·
इदं चासंगतमिव भाति सुच इति न्यासे चतुः करोतीत्यत्र इदुदुपधस्येत्येतद्बहिःस्यासुच इत्यस्यासिद्धत्वात्· नित्यषत्वाप
त्तेः सिद्धान्ते तु चतुर्ग्रहणासामर्थ्यान्न नित्यषः समाधानं तु सुच इति न्यासे इदुदुपधस्येत्यतः प्राक् पाठ्य इति न कश्चिद्दोषः
२० इको गुणवृद्धी· इग्ग्रहणमात्सन्ध्यक्षरव्यञ्जननिवृत्त्यर्थमिति· अत्र च कैयटग्रन्थः अकारस्य सत्यसति च गुणे कृते
[illegible] वार्त्तिकेन कृतमिति· अत्र केचिद्विशेषं दर्शयन्ति· अकारस्याकारे गुणे कृते पचिथेत्यत्र।

पू·प·
८

स्यादिति वाच्यम् ङादेशेनैव सिद्धेः न च मत्यामित्यादौ ङेः आमादेशे आटं न घाडित्याणा न स्यात् ङादित्वाभावात् अत्राटः अपो

जनन्तुनुद्वाधनरूपं स्थानिवद्भावस्तु न विशेषणेनाप्य लाश्रयणे ऽनल्विधाविति निषेधादिति वाच्यम् ङेः आमित्यत्र ङे ङाम्त्रया

मीभ्य इत्येव सूत्रमस्तु ङेः ङामादेशेन सकलेष्टसिद्धेः अत्र समाधानं मृग्यमिति केचित् तन्न ह्रस्वान्तान्ङित इति वक्तव्ये आ

दिग्रहणाद्यस्मिन्विधिरित्यस्यानित्यत्वात् विशेषणविशेष्यभावेन तदन्तविधेः ङान्ते सुपीत्यर्थोपपत्तेः उदाहरणमात्रे पि प्रा

प्रसक्तत्वं वारणादाड् बलीय इति न्यासमेवरमणीयमिति पाठान्तरं न नुडेङामि कृते इत्यत्रापि प्राप्त्या आडागमोपि प्राप्तः

तत्रवाराणादाड् बलीय इति न्यायादित्संज्ञां बाधित्वा आट् स्यात् ततश्च प्रत्ययादित्वाभावान्ङकारलोपो न स्यात् अतएव

वान्तरङ्गस्यापि पूर्वं ङलोपो न वार्णपरिभाषा असिद्धपरिभाषा वाधिकेति सिद्धान्तात् नित्यत्वाच्च पूर्वमाडागम इ

ति केचित्समाधानं कुर्वन्ति ९७ अनेकाल्शित्सर्वस्य अत्र सूत्रे शेखरकृतोक्तम् नानेकाल्शिदिति सूत्रितम् तथा सा

तिअनन्तरस्येति न्यायेनेदमदः परस्येव बाधकं स्यान्न तु ङिच्चेत्यस्येति इदं विरुद्धं तथासति ... अत्र समाधानं विभा

त्यस्त्र लोपः स्यस्त्यन्त्यस्य भविष्यत्येवेति तद्व्यर्थं सदनन्तरस्येति न्यायोत्र न प्रवर्त्तत इति ज्ञापयिष्यति तस्य लोपे पंचमी तु न भवतित्य

वयन्तु सुधियः ९८ अदर्शनं लोपः अत्र सूत्रे शेखरे उक्तम् प्रसक्तपदाभावग्राभतिष्ठति ... अदर्शनम् एवं च प्रत्ययलोपे प्रत्य ८

वन्नार्थनिरूपिताधिकरणत्वं प्रामस्य नास्तीति न दोषः पश्चादुक्तं त्रपु इत्यत्र तु गापत्तिरस्तिचातुर्वेकपादर्शनम्

तिरूपं सिद्धम्· एतच्च तद्धितग्रहणे सत्येव संगच्छते· अन्यथा पुंवद्भावाप्रवृत्तेः यत्रन्ताभावेन ष्फो न स्यादिति केनचित्समाधानमु
क्तम्· तन्न· भाष्ये तु गोकक्ष्याशब्दस्य क्रोड्यादि पाठः प्रत्याख्यातः गोकक्ष्या इति रूपसिद्धिस्तु यङश्चाप् इति चापः प्रवृत्तावपि षाद्य
न्तश्चाब्वाच्य इति वार्तिकेन चाप्· न च गोकक्ष्यायणीति रूपसिद्धिः ष्फप्रत्ययस्य चापो प्रवाक्कृत्वादिति वाच्यम्· प्राचां ष्फ
इति सूत्रे सर्वत्र लोहितादित्यादेः सर्वत्रग्रहणानुवृत्तिस्तच्च क्वचिद्बाधकविषयेपि प्रवृत्त्यर्थम्· गोकक्ष्ये इति तु उदीचां मते·
एवं च गोकक्ष्यायाः प्रतिषेधो वक्तव्य इति संप्रसारणनिषेधकवार्तिकमपि नाश्रयणीयमित्यपरमनुकूलम्· ९५ नञ्स्नञी
कक्ख्युंस्तरुणतलुनानामुपसंख्यानम्· अत्र तरुणतलुनयोर्वयोवाचित्वाभावाद्वयसि प्रथमे इत्यस्याप्राप्तौ वार्तिके त
योरुपादानम् न च वयस्य चरम इति वाच्यमिति वार्तिकेन ङीप्सिद्धेः पुनस्तद्ग्रहणं व्यर्थमिति वाच्यम्· तरुणतलुन
योर्गौरादौ पाठेन तत्सामर्थ्यान्ङीपो बाधो माभूदिति वार्तिके तयोर्ग्रहणम्· वार्तिके गौरादौ पाठोपि नियामोस्तु· वह्लादौ त
रुणतलुनयोः पाठः कार्यः तेन वह्लादिभ्यश्चेति पक्षे ङीष्· तदभावे वयस्यचरम इति ङीप्· एवं त्रिसकलेष्टसिद्धिः अत्र
समाधानं विभावयन्तु सुधियः ९६ घेर्ङिति अत्र घेर्ङितीत्येवमस्तु सुपि चेत्यतः सुपीत्यनुवर्तनेन तच्च विशेष्यम्· ङि· इति विशेष
णम्· एवं च यस्मिन्विधिस्तदादावल्ग्रहणे इति परिभाषोपतिष्ठते तथा च ङसौ सुपि गुणो भवतीत्यर्थः न च प्रवाहवेत्यादौ
प्रवाहुशब्दात्तृतीयैकवचनम्· तत्स्थाने आङ्याजयाराणामुपसंख्यानमिति वार्तिकेनाङादेशः तत्र ङित्वाभावाद्गुणो न

पू·प· नित्जसित्यादयं षडिति निर्देशेन षस्य चर्त्वेन टकार एव न षकारः जश्त्वापवादकत्वं चर्त्वेन तस्येति अन्यस्तु पूर्वापरविरुद्धः

७ उपानदित्यत्र शेखरे उक्तं धत्वजश्त्वचर्त्वादीनीति। लदसंगतं स्यात्· किंच चतुर्णामित्यत्र णत्वं द्वित्वमिति प्रतीकमुपादाय न तु

द्वित्वमित्येव युक्तम्· पूर्वत्रासिद्धीयमद्वित्वे इति वचनात्· ड्वं च वर्णद्वित्वेपि प्रवर्तते· वाक्·वाग्ग इति भाष्योदाहरणात्

अन्यथा द्वित्वदृष्ट्या चर्त्वस्यासिद्धत्वादसेवा द्वित्वे; न्यस्य चर्त्वे पूर्वत्रग अवणापत्तेरित्युक्तम्· तस्मादध्यायाति पूर्वं ज

श्त्वं पश्चाच्चर्त्वमिति· ४प्राचां ष्फ तद्धितः यञन्तात्ष्फो वा स्यात् स्त्रियां स च तद्धितः अत्र सूत्रे तद्धितग्रहणं प्रातिपदिकसंज्ञार्थ

म्· तत्फलं तु षिद्गौरेति ङीष्प्रसिद्धिः तत्रापि प्रातिपदिकाधिकारात्· ननु षित्वसामर्थ्येन साधितं· यस्येति लोपार्थमपि।

तद्धितसंज्ञा नापेक्षिता· गार्ग्यायणीत्यत्र सवर्णदीर्घेणापि रूपसिद्धेः पुनस्तद्धितग्रहणं ज्ञापयति क्वचिदन्यतोपि ङी

ष्· तेन आसुरेरुपसंख्यानमिति सिद्धम्· न च प्रातिपदिकसंज्ञार्थं तद्धितग्रहणमप्याव[illegible] षित्वसाम।

र्थ्यात् प्रातिपदिकत्वेपि ङीष् भवतीति ज्ञापनात्· न ह्येकेनैकमेव ज्ञाप्यं यावता विनानुपपत्तिस्तत्सर्वं ज्ञाप्यमिति स्वी। एम

कारात्· न च गोकक्ष्यायणीति रूपासिद्धिः गोकक्षशब्दो गर्गादिस्तेन यञन्तत्वान्नात्फो ड्यादिभ्यश्चेति ष्यङ्· ततो यङश्चा ७

विति चाप्· गोकक्ष्या ततः ष्फप्रत्यये विवक्षिते भस्याढे तद्धिते इति पुंवद्भावस्तेन ष्यङ्· चापो[illegible]वृत्तिः फस्यायनादेशः षित्वान्ङीष्

घेस्तर्हि सुप्येवेति · एवं च केशवः अङ्गे नेत्यादौ न दीर्घः तुरुस्त्विति सूत्रात् सार्वधातुकपदानुवृत्तौऽङ्गस्य सार्वधातुकग्रहणं किमर्थमिति प्रश्नः
समाधानं तु राजभ्यामित्यादौ नियमसत्त्वेपि दीर्घापत्तिः नच नलोपः सुप्स्वरेति नलोपस्यासिद्धत्वमिति वाच्यम् · सुप्त्वतद्व्याप्यधर्मावच्छि
न्नोद्देश्यकैकार्ये एव नलोपस्यासिद्धत्वमिति स्वीकारात् १२ ज्योतिरायुषस्तोमः अत्र समासेङ्गुलेः सङ्ग इत्यतः समास इत्यनुवर्त्तते · तथा चा
यमर्थः · ज्योतिश्शब्दाच्च स्तोमस्य सस्य षः स्यात्समासे · उदाहरणं · ज्योतिष्टोमः आयुष्टोमः अत्र मनोरमायां ग्रन्थेसमाप्ते इत्या
स्य प्रत्युदाहरणमुक्तम् · ज्योतिषः स्तोमः आयुषः स्तोम इति च · इदं चासंगतमिव भाति समासपदाभावेपि इणः को
रित्यनुवृत्त्या इणः परत्वाभावादेव षत्वाप्रवृत्तेः अत्र केचिदित्थं लापयन्ति ज्योतिषस्तोम इति न प्रत्युदाहरण।
म् · किन्तु ज्योतिषूनामज्योतिश्शब्दात्परो यस्तोमशब्दोऽव्यपेक्षायं तत्र षत्वं स्यादित्यर्थकं तिष्ठतु ज्योतिस्तोमोस्ति
ब्राह्मणानामित्यादौ विति मत्वाशयः १३ रामात्त एमादिति अत्र जश्त्वं वावसाने इति मूलग्रन्थः तत्र मनोरमादिग्रन्थे इ।
त्थं व्याख्यातम् · पूर्वं जश्त्वं पश्चाद्वावसाने इति · खरि तु जश्त्वं बाधित्वा वावसाने इत्युक्तम् · बाधकत्वं त्वपवादक
त्वेन · तच्च जश्त्वाप्राप्तियोग्ये चर्त्वस्याचारितार्थ्यरूपम् · इदं चासंगतम् · रत्नमुट् रत्नमुडिति रूपद्वयस्यासिद्धि
प्रसङ्गात् · रत्नमुष् इत्यत्र जश्त्वं बाधित्वा षस्य षरावचर्त्वेम् · तथा च रत्नमुष् रत्नमुडिति स्यात् · अत्र केचिद्दद

पू·प· ६

कक्तव्यइत्यनेनपरमशब्दस्यलोपेपुनःकारीषगन्ध्यस्यपुत्र इतिविग्रहेतत्पुरुषसमासेकारीषगन्ध्यापुत्रइतीष्यते·सूत्रेऽ
नुपसर्जनस्येतिप्रतिषेधेतुष्यङ्नतस्येहोपसर्जनत्वेनस्यात्· नचविनापिप्रत्ययमित्यस्यसंज्ञायामेवनह्रत्याभीमःसेनइत्या
द्युदाहरणेनप्रकृतेसंज्ञाविषयेनस्यादितिवाच्यम्·स्तोःश्चुनेतिसूत्रेयोगशब्दःसंयोगपरःसत्याभामेत्यादिवत्पूर्वपद
स्यलोपइतिनवीनोक्तशेखरादिग्रन्थविरोधापत्तेः ९० इजादेश्चगुरुमतोनृच्छः इजादिर्योधातुर्गुरुमानृच्छत्यन्यस्ततआ
मस्याल्लिटि एधाञ्चक्रे· इजादेःकिम्·ववौ·गुरुमतःकिम्·उवाष अनृच्छःकिम्· आनर्च्छ· अत्रापिस्यात्· नच
ऋच्छत्यृतामितिलिटिगुणविधानेव्यर्थंस्यादामाव्यवधानादितिवाच्यम्· गुणविधानसामर्थ्यादामाव्यवधाने।
पितत्प्रवृत्तिरितिशेखरेसमाहितम्· अत्रेयमाशङ्का।सूत्रेऽनृच्छइतिपदाभावेआनर्च्छेत्यत्रामप्राप्तःगुणेपि।
प्राप्तःतत्प्रतिषेधोक्तत्वादपवादत्वाच्चगुणेकृतेइजादित्वाभावादामःप्राप्तिरेवनेतिव्यर्थमनृच्छग्रहणम्· अत्र
समाधानंविभावयन्तुसुधियः ९१ अतोदीर्घोयञि· अत्रसार्वधातुकपदाभावेकेशवः अङ्ग·ना·केशाद्वोन्यतरस्याम·
अङ्गेनेत्यत्रपामादित्वान्नः अत्रापिदीर्घापत्तिरितिमनोरमाग्रन्थेदूषणमुक्तम्· तन्नसंभवति·सुपिचेतिनियमा। राम· ६
र्घंभविष्यति·सार्वधातुकपदाभावेरामायेत्यादावप्यतोदीर्घोयञीतिसिद्धेः नियमश्चसार्वधातुकभिन्नेयञादौयदिदी

हुत्वन्नास्ति तत्रैषा अप्यसिद्धत्वमन्यदपि भाव्यताम्· ९ स्त्रीप्रत्यये चानुपसर्जने नेति· अनुपसर्जनस्त्रीप्रत्यये तदादिनिय।
मो न उपसर्जने तु तदादिनियमो भवत्येव· तदादिनियमो नेत्यस्य प्रत्ययग्रहणे यस्मादिति परिभाषोपस्थितिर्नेत्यर्थः अस्या
उदारणं तु परमकारीषगन्धीपुत्र इति करीषस्येव गन्धो यस्य स करीषगन्धिः उपमानाच्चेति गन्धस्येकारादेशः करीषगन्धेर
पत्यं स्त्रीत्यर्थे तस्यापत्यमित्यणि अणिञोरनार्षयोरित्यणः ष्यङादेशो वृद्धौ यङश्चाविति चाप् कारीषगन्ध्या· परमा।
चासौ कारीषगन्ध्या चेति परमकारीषगन्ध्या तस्याः पुत्रः अत्र ष्यङः संप्रसारणं पुत्रपत्योस्तत्पुरुषे इति संप्रसारणे पू
र्वरूपे संप्रसारणस्येति दीर्घः अत्र ष्यङन्तं यत्पूर्वपदं तस्य संप्रसारणमित्यर्थः प्रत्ययग्रहणपरिभाषानुपस्थित्या प
रमकारीषगन्ध्या इति विशिष्टस्य ष्यङन्तत्वेन संप्रसारणं सिध्यति अतिकारीषगन्ध्यापुत्र इत्युपसर्जने न प्रत्ययग्र
हणपरिभाषोपस्थित्या कारीषगन्ध्येत्यस्यैव ष्यङन्तत्वेन तस्य पूर्वपदत्वाभावान्न संप्रसारणमित्यर्थः अत्रोच्यते·
अतिकारीषगन्ध्यापुत्र इत्यत्र संप्रसारणाभावार्थं स्त्रीप्रत्यये चेति परिभाषा स्वीकर्तव्येति स्थितं तदर्थं तु नाश्रयणी
या ष्यङः —————— संप्रसारणमिति सूत्रे ऽनुपसर्जनस्येति वक्तव्यम्· अनुपसर्जनस्य ष्यङन्तस्य संप्रसा
रणं भवतीत्यर्थे नातिकारीषगन्ध्यापुत्र इत्युपसर्जने संप्रसारणाभावः सिद्ध एवेति परिभाषा न कर्तव्या· अत्रेत्थं
समादधती नवीनाः परिभाषासत्त्वे परमकारीषगन्ध्या यस्य स पर[illegible]षगन्ध्यः विनापि प्रत्ययं पूर्वोत्तरपदयोर्लोपो

पू.प. मू. मोदुहशब्दान्मतुपिहकारस्य दादेरिति घत्वंकृते झलां जशोन्ते इति जश्त्वेन गकारे प्रत्यये भाषायामित्यनेनानुनासिके ङका
५ रे त्रिपाद्यां पूर्वं प्रति परस्यासिद्धत्वाभावात् झषन्तत्वाभावेनैकाच इति सूत्रेण भष् भावो न स्यादिति तदाशयः एवं च शब्द
रत्नमन्यो विरुद्धः पदान्ते भष्भावो जश्त्वापवादः एवं चापवादत्वाज्जश्त्वात् पूर्वमेव भष्भावे दोषाभावः एवं च शब्दरत्न
ग्रन्थखण्डनं कुर्वन्तु मनीषिणः शेखरे तु घत्वे कृते झपदिति वत्वं स्यादिति रूपासिद्धिरूपदूषणमुक्तं तत्सम्यगेव. शब्दरत्नके
चिदित्थं लापयन्ति परे तु भष्भावस्य जश्त्वापवादकत्वेपि. अनुनासिकापवादकत्वाभावेन तत्र छत्वे भष्भावो न स्या।
दिति तदर्थः जश्त्वे कृते इत्यस्य जश्त्वप्राप्तावित्यर्थः अस्मिन्पक्षे शेखरे लोके ऽनहार्थेत्यादिना नियामक इत्युक्तम्. तस्या
यंभावः यथा भूतले घटो नास्तीत्यादौ भूतलाधिकरणघटकर्तृकसत्तात्यन्ताभावज्ञानं प्रतिबन्धकम्. त्रिपादीस्थशास्त्र।
सिद्धमेव तत्रापि त्रिपादीस्थकर्तृकमभावज्ञानं प्रतिबन्धकम्. एव च पूर्वशास्त्रं प्रति त्रिपादीस्थशास्त्रमसिद्धमित्यनु
पपन्नमेव स्यात्. अतः दर्शनाभावरूपे लोपे भावारोपस्य दर्शनाभावरूपत्वेनादोषात् भावाभावस्य प्रतियोगिरूपत्वात्. इ = राम ५
त्यत्र शंक्यते भावाभावस्य प्रतियोगिरूपत्वेनाल्प्राप्तावपि परत्वात् ढलोप इति दीर्घापत्त्या रूपासिद्धिस्तदवस्थैव. न चैवं त
दूदृस्याः सिद्धत्वमाश्रयासिद्धत्वात्. अत्र समाधानं ढलोपसाहचर्येण कर्मणो रोमन्थ इत्यादिनिर्देशेन यत्र शास्त्रान्तरदृष्ट्या

दिभ्य इति नियमात्· स्यसिच्सीयुट्तासिष्विति सूत्रे प्रकृतेरयीडागमप्राप्नोतीत्याशङ्क्य आर्द्धधातुकस्येडित्यतोऽत्रार्द्धधातु
कग्रहणमनुवर्त्त्य योगविभागमाश्रित्य यावानिट् स सर्वोऽपि आर्द्धधातुकस्यैवेति नियमात्प्रकृतेर्नेडित्युक्तम्· अयं भाष्यग्रं
थः पूर्वापरविरुद्धः शेखरग्रन्थोऽपि भाष्यविरुद्धः अत्रेत्यं विरोधोद्धारं केचित्कुर्वन्ति विधिसूत्रे प्रयोजनं नास्तीति प्रत्या।
ख्यानार्थः योगविभाग एव तत्प्रयोजनमित्यर्थः जुगुप्सत इति शेखरग्रन्थस्तु आर्द्धधातुकग्रहणमनुवृत्त्योक्तम्· व्यपदेशिव
द्भावोऽप्रातिपदिकेन· अत्र च ज्ञापकम्· पूर्वादिनिः सपूर्वाच्चेति सूत्रद्वयकरणम्· अन्यथा पूर्वादिनिः सपूर्वाद्वित्येकयो
गेनैव निर्वाहात्· न चेष्टादिभ्यश्चेत्यत्रानुवृत्त्यर्थम्· सपूर्वादिति पृथग्योगस्यावश्यकत्वे नानिष्टेति सिद्धमिति वाच्यम्·
अनिष्टीत्यस्यानिष्टत्वात्· इष्टत्वे एकयोगकरणेऽप्येकदेशानुवाधकाभावात्· एवं च परिभाषाज्ञापकम्· इयं च धर्मिग्राह
कमानात्प्रत्ययविधिविषयैव· अत एव नान्तादसंख्यादेर्मडिति चरितार्थम्· अत एवेत्यस्य प्रत्ययविधिविषय।
त्वादेवेत्यर्थः ननु परिभाषास्वीकारादेवेत्यर्थः अग्रे नान्तादसंख्यादेरित्यस्याप्रत्ययविधित्वेन तत्र संख्यानोक्तविरोधात् ८
पूर्वत्रासिद्धम्· अयमधिकारो विधिश्चेत्युभोपक्षौ शास्त्रे निर्णीतौ· अधिकाराभावे त्रिपाद्यां पूर्वं प्रति परं नासिद्धं स्या
दिति मनोरमाग्रन्थः अत्र शब्दरत्नग्रन्थे तथा सति गोधुङ्क्ष्मानित्यादौ घत्वजश्त्वानुनासिके कृते भष्भावो न स्यादित्युक्तं

२।

चितः सप्रकृतेर्बह्वकजर्थम् चितस्सप्रकृतेरन्त उदात्तो भवतीति तदर्थः नतु प्रत्ययमात्रस्यान्त उदात्त इति अत्राकच्श्चित्त्वज्ञा
पृ.प. पकम् अन्यथाकच्प्रत्ययकात्वेन प्रत्ययस्वरेणैवोदात्तत्वे सिद्धे तल्लाघवार्थं सदत्रज्ञापकमिति शेखरग्रन्थः तास्यनुदात्तेन्ङि
४ दुपदेशाल्लसार्वधातुकमनुदात्तमन्विङोः अस्मात्सार्वधातुकमनुदात्तं स्यादिति तदर्थः ह्नुङ् अधीङोवर्जयित्वा । १
अत्र सूत्रे शेखरग्रन्थे रुणाद्धीत्यत्र श्नमोमित्वेन परश्चेत्यस्य बाधेतत्सन्नियोगशिष्टप्रत्ययाद्युदात्तस्याप्राप्तौ ता।
अत्र सूत्रे शेखरग्रन्थे रुणाद्धीत्यत्र श्नमोमित्त्वेन परश्चेत्यस्य बाधेतत्सन्नियोगशिष्टप्रत्ययाद्युदात्तस्याप्राप्तौ । यथात्र मित्त्व
न्मध्यपतितन्यायेन विशिष्टस्य धातुत्वाद्धातुस्वरेणान्तोदात्तत्वमित्युक्तम् अयंग्रन्थः परस्परविरुद्धः यथात्र मित्त्व
न परश्चेत्यस्य बाधे तत्सन्नियोगशिष्टप्रत्ययाद्युदात्तत्वस्यापि बाधः एवमकच्यपि प्राकटेरेहणेन परश्चेत्यस्य बाधे तत्स
नियोगशिष्टप्रत्ययाद्युदात्तत्वस्याप्राप्त्यौज्ञापकतावर्णनमयुक्तमिति विरोधः अत्र नवीनैरित्थं परिह्रियते उभशब्द
स्य सर्वादिपाठो व्यर्थ इति प्रघट्टके भाष्यग्रन्थेकश्चेदानीं काकचोः स्वरविशेषो नास्तीति अस्मादेव भाष्यात् अकचिस
नियोगशिष्टन्यायस्यानाश्रयणमन्यनाश्रयणे प्रमाणाभावः अन्यदपि विभावयन्तु सुधियः ॥ ७ ॥ आ
र्द्धधातुकस्येड्वलादेः आर्द्धधातुकग्रहणं किम् जुगुप्सते अत्रापीट्स्यादिति शेखरग्रन्थः अत्र सूत्रे भाष्ये कृतं इट्
नोरिति सूत्राद्धातोरित्यनुवर्त्य धातोर्विहितस्य धातुपदमुच्चार्य विहितस्य वलादेरिडित्यर्थो न जुगुप्सते इत्यत्र नेडित्याह ७

चित्वस्य ५

स्याप्रवृत्त्याघूर्णावान्ब्राह्मणीत्यत्रदीर्घोच्चारणस्यसाफल्यात् इतिदूषणाभासएववस्तुतस्तु॰ अन्तरङ्गत्वात्प्रागेवदीर्घेणकाप्यनुपपत्तिः
षात्पदान्तादिति॰ पदान्तात्षकारान्नस्यणत्वंनेतिसूत्रार्थः निष्पानंसर्पिष्पाममित्याद्युदाहरणम्॰ अत्रकृत्यचः भाव
कर्मणोरितिचप्राप्तंणत्वंनिषिध्यते अत्रसूत्रेपदान्तात्किम् पुष्णातीतिप्रत्युदाहरणम्॰ तत्ररषाभ्यामितिणत्वस्यप्र
तिषेधःस्यादितिपदान्तादित्युक्तमितिमनोरमाग्रन्थः अत्रेयमाशङ्कापुष्णातीत्यत्रणत्वनिषेधेपिष्टुत्वेनरूपसिद्धि
रितिव्यर्थमेवपदान्तग्रहणमिति॰ अत्रोच्यते॰ रषाभ्यामितिसूत्रेभाष्येउक्तम्॰ षग्रहणमुत्तरार्थं॰ षात्[illegible]ष्टुस्व
ननिर्वाहात्॰ एवंचषात्पदान्तादित्यनेनापिष्टुत्वस्यैवनिषेधः एवञ्चपदान्तग्रहणाभावेपुष्णातीत्यत्रष्टुत्वनिषेधेरूपासि
द्धिःस्पष्टैवेतिसमाधानम् ५ ददातिदधात्योर्विभाषा॰ आभ्यांशःस्यात्॰ ददः दधः आभ्यांशपिजुहोत्यादित्वाच्छ
पः श्लौद्वित्वेआतोलोपेसिद्धम्॰ ददः दधः पक्षेआदन्तलक्षणोयुकिदायःधायः इति॰ अत्रेयमाशङ्कामास्त्विदं
सूत्रम्॰ दददानेदधधारणेइमौधातूआभ्यांपचाद्यचिददः दधः आदन्ताभ्यांदाधाभ्यांणोयुकिदायःधायः इति॰ अ
त्रोच्यते॰ अविक्लवेनददः अददइतिनञ्तत्पुरुषेतुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः इत्यनेनाव्य
यपूर्वपदप्रकृतिस्वरइष्यतेतंबाधित्वाअव्ययवशक्तौ॰ अजन्तकान्तमन्तोदात्तंस्यादशक्तौ इत्यन्तोदात्तस्यादितिसूत्रम्॰ ६

नुमः धातोर्विचि तन्निमित्ते गुणे कृते भो इति रूपम् ततः साध्वर्थे तत्र साधुरिति यति भोयमिति भविष्यति तन्न स्यादिति समाधानं
यथाकथंचित् अन्यत्समाधानं जनानवतीति जनोः तस्मात्साध्वर्थे यति जनोयमिदं दुरूहं दूषणं बोध्यम् अतोन्यत्समाधा
नं विभावयन्तु सुधिय इत्याहुः अत्रोच्यते यिप्रत्यये इति शब्दाध्याहारो निमित्तत्वसप्तम्यर्थस्तत्स्फोरकं तु तन्निमित्तस्यैवेति नापूर्वं
बालबोधनार्थं ततश्च यादिप्रत्ययनिमित्तकस्य धातोरेचो वान्तादेशविधानादिष्टं सिध्यति सप्तम्यर्थस्य निमित्तकत्वाभावेन ओयते
ओयत इति प्रत्युदाहरणम् किंच वान्तो यि प्रत्यये इत्यस्य तु गोपयसोर्यदिति तद्धिते सुबन्तात्प्रातिपदिकाद्वा तद्धितविधानसिद्धौ
गव्यादौ नामविषयत्वमेव वान्तो यि सूत्रस्य भाष्याल्लभ्यते न तु धातुविषयत्वं ततश्च धातोरित्यारब्धमृषिणा० ॥ ए
वं च नयकौ इत्यादि निषेधादिति गोयं भोयमित्यादौ नामनभिधानादसाधुत्वं तथा च नयकौ इति न्यास एव लाघवादस्तु अत्र
धातोर्ग्रहणं न कर्तव्यं न चाधातोर्दूषणमिति वाच्यं भवतु कुत्रापि दोषः तदभावे प्रातिपदिकस्य स्यान्न धातोर्नेत्यद्धा तेनानु
वृत्तिर्धातोर्ग्रहणसामर्थ्यादिति बोध्यम् ध्येयमिदं १ असिद्धं बहिरङ्गमन्तरङ्गे अस्याश्च वाह ऊठ् सूत्रस्य मूरु ग्रहणं
सकम् अन्यथा वसोः संप्रसारणमिति सूत्रात्संप्रसारणपदानुवृत्त्या वाह इति सूत्रेण वकारस्य संप्रसारणे कृते पूर्वरू
वनिमित्ते णिजनिमित्ते वा लघूपधगुणे कृते पश्चाद्वृद्धिरेचीति वृद्धौ सिद्धं विश्वौहः विश्वौहेत्यादीति भाष्ये एव
र ग्रन्थसिद्धान्तः अत्रेयमपूर्वशङ्का केनचिदुद्भाव्यते ऊठाकरणे यद्यपि न रूपासिद्धिरूपो दोषस्तथापि स्वरासिद्धिरूपो

प घण्णुश्रेषुभ्यः ऊठादिभ्यः परायाः सर्वनामस्थानविभक्तिः सोदात्तास्यादितिसूत्रार्थः एवंचोठोकरणोकथमूठनिमित्तकोविभ
२ क्तदात्तः स्यात् ऊठः स्थानेसंप्रसारणाकरणेतुयूनः यूनेत्यादावतिव्याप्तिस्तस्मादयुक्तोभाष्यादिग्रन्थः अत्रोच्यतेऊ
डिदंपदादितिसूत्रेवविदंपदादित्यत्र उश्च ऊश्च अनयोः समाहारउ वश्चवाश्चवौ लोपोव्योरितिवस्यलोपः तयोः स्थानेउइ
इति वोऽदमित्यवादेशेवविदंपदादीति तथाचवइतिव्यंजनमात्रस्यस्थानेयोदीर्घऊकारोवाइत्यस्यस्थानेयोह्रस्वउका
रस्ततः परायासर्वनामस्थानविभक्तिःसोदात्तास्यात् आद्यस्योदाहरणंजूरः जूरा ज्वरत्वरेत्यूठ द्वितीयस्योदाहरणंवि
श्वोहेतिकथंचित् केचित्तूठग्रहणंपरिभाषाज्ञापकमित्यस्यदीर्घोच्चारणंज्ञापकमित्यर्थः। संप्रसारणेऊठिकृतेतन्निमित्तकेगु
णेकृतेवृद्धौविश्वौहेत्यादिसिद्धिः ऊडिदंपदादीत्यत्रउवि दंपदादीतिन्यासेजूरः जूरेत्यत्रविश्वौहेत्यत्रचस्वरसिद्धिरि
तिसमाधानंकुर्वन्ति अथवाशतुरनुमोनद्यजादीएतदग्रेवाहइतिसूत्रंकर्तव्यम् वाहः परोनद्यजादीउदात्तौभवतः न
घा स्वरविधानान्ङीप्प्रसिद्धिरित्यपिसमाधानान्तरम् अन्तोदात्तादुत्तरपदादन्यतरस्यामनित्यसमासेइत्यनेनऊडिदमि
त्यस्याग्रेपाठेनस्वरसिद्धिः तज्ज्ञापकपरभाष्यप्रामाण्यात्व्यवस्थितविभाषा संबन्धसामान्येषष्ठ्यन्तसमासान्तइतिवा राम
अन्यत्समाधानंविभावयन्तुसुधियइत्याहुः अत्रोच्यते कृदिस्युपस्थितिविषयस्यप्राबल्यमर्थसिद्धमेव विलम्बोपस्थि २

प्रसिद्धमेवेति कालभेदेन कार्यसिद्धिरन्वाख्यानदशायां तत्रोठ्ग्रहणे नापि तदर्थ एव प्रतिपाद्यते स्वरविधायके सूत्रे वा पूर्वं
मेव ऊठ्ग्रहणेनैव स्वरसिद्धिः लौकिके वाक्ये प्रायः स्वरादिजिज्ञासापि गुणीभूतैव· नह्येकेनैकमेव ज्ञाप्यत इति निय।
मः यावता विनानुपपत्तिस्तावत्सर्वं प्रतिपाद्यते· तथा च स्वरविधायके सूत्रे निष्प्रमाणकव्यत्यासकल्पने मानाभावात्· भाष्या
नुक्तत्वेनाप्रामाण्याच्चेति वृद्धिसूत्रस्थभाष्ये एकेनाप्यक्षरेणानर्थकेन न भवितव्यम्· तन्नत्सूत्रानुपूर्वीविघट्टने शास्त्रहा
निर्दोषमविदुषां पण्डितंमन्यानामियमुक्तिर्भाष्याभिज्ञैर्नोदर्तव्या २ विभक्तिश्च· सुप्तिङौ विभक्तिसंज्ञौ स्तो संज्ञाप्रदेशानीव।
भक्तौ नुस्मा इत्यादयः अत्रोच्यते· विभक्तिश्चेति सूत्रं मास्तु· न विभक्तावित्यत्र सुप्तिङ्ग्रहणमेवास्तु· अष्टन आ इत्यादि
विभक्तिपदघटितसूत्रे सुपीत्येवास्तु· त्यदादीनाम इत्यादौ सुपीत्यनुवृत्त्यैव सिद्धेः नच त्यदादीनाम इत्यत्र सुब्ग्रहणे
यत्र तत्रेत्यादौ प्राग्दिशो विभक्तिरिति विभक्तिसंज्ञके त्रलादाव त्वानापत्तिरिति वाच्यम्· तेनापि सुप्संज्ञाया एव विधाना
त्· नच सुप्संज्ञायामेतर्हि इत्यादौ सुपि चेति दीर्घापत्तिरिति वाच्यम्· सुपि चेत्यत्रापि भीति न्यासेन निर्वाहात्· यादौ भादौ च।
[illegible]ीति तदर्थात्· नच यत्र तत्रेत्यादौ सुपो धात्विति त्रलादेर्लुगापत्तिरिति इदानीं तदानीमित्यादौ सुप्पितावित्यनुदात्तौ च
स्यादिति वाच्यम्· त्रतसिलादीनां विधानसामर्थ्येन लुगनापत्तेः त्रलादौ भलित्करणेन

रूप· दृग्दिशीयेऽनुदात्तौ सुप्पितावित्यस्याप्रवृत्तिरिति समाधानं विभावयन्तु सुधियः· अत्रोच्यते· विभक्तिश्चेति हृ
३ ऽभावेन सुप्तिङोः सुस्मा इति सूत्रन्यासः सुप्तिङ्संबन्धिनवर्गसकारमकारा इतो नस्वरिति सूत्रार्थे राजेत्यादौ हृ।
ल्ङ्यादिलोपप्राप्ते निषेधापत्तौ हल्ङ्यादिसूत्रवैयर्थ्यकल्पनम्· त्यदादीनामइत्यत्रासुब्ग्रहणं यत्र तत्रेत्यादि प्रा।
ग्दिशोर्विभक्तिसंज्ञकेऽत्रादौ सुप्स्वरत्वाभावादत्वानापत्तेस्तत्र सुपि चेत्यत्रापि भीतिरिति निर्मूलकन्यासः कल्प्यते· तत्राप्यल्ग्रहणे
नदादिबोधकवचनाभावात् यादौ भादौ सुपीत्यत्र प्रमाणाभावादित्यपि दोषः· यस्मिन्विधिस्तदादावल्ग्रहणे इति।
परिभाषणात्· यत्र तत्रेत्यादौ सुपो धात्विति त्रादेर्लुगापत्तौ त्रतसिलादीनां विधानसामर्थ्यमपूर्वं कल्पनम्· त्वला
दौ लित्करणसामर्थ्याकल्पने गौरवमिति· निष्प्रमाणकेन इदानीं तदानीमित्यादावनुदात्ततावारणे महान् प्रयास
इति गौरवम् तदपेक्षया विभक्तिश्चेति यथान्यासमेवास्तु· इति समाधानं भाष्यतत्त्वज्ञैश्चिन्तनीयम् ३ घुणघूर्णिभ्र
मणे· अत्र दीर्घोच्चारणं प्रक्रियालाघवाय· अन्यथा कुर्दादिवत् उपधायां चेति दीर्घसिद्धेरिति शेखरग्रन्थः· अत्रके
चिद्वदन्ते· अयुक्तोऽयं ग्रन्थः दीर्घोच्चारणं न केवलं प्रक्रियालाघवार्थं एवं यत्रोपधायां चेत्यस्याप्राप्तिस्तत्र दीर्घोच्चा राम·
रणसामर्थ्यात्· घूर्णिधातौ वनिपि विड्वनोरनुनासिकस्येत्यनेन णकारस्यात्वे हल्परे रेफपरत्वाभावेनोपधायां चेत्य ॥ ३

पृ.प. श्रीगणेशाय नमः यत्तु धातोस्तन्निमित्तस्यैवेति सूत्रे यादौ प्रत्यये परे धातोरेचश्चेद्वान्तादेशस्तर्हि तन्निमित्तस्यैवेति सूत्रार्थः नियमा
१० र्थमिदं सूत्रं लव्यमित्यादौ वान्तो यि प्रत्यये इत्यनेनैव सिद्धत्वादिति· एवग्रहणं तु विपरीतनियमस्य बाधनार्थम् अन्यथा यादौ प्रत्यये
परे एचश्चेद्वान्तादेशस्तर्हि धातोरेवेति नियमः स्यात्· तथा सति वाभ्रव्यादौ वान्तादेशो न स्यात्· अत्र हि मधुबभ्र्वोर्ब्राह्मणकौशि
कयोरित्यनेन यञ्प्रत्ययः ओर्गुणस्ततो वान्तादेशः अत्रोकारस्य यादितद्धितनिमित्तकत्वेपि धातवीयत्वाभावाद्वा
तादेशो न स्यात्· अत्रोच्यते· इदं सूत्रं यादिप्रत्ययनिमित्तकस्यैवैचो वान्तादेशनि ४४ ४४ ४४ ४४
वृत्त्यर्थमिति फलितम्· तेन आयते आयत इत्यादौ न वान्तादेशः आङ्पूर्वाद्ध्वेञः कर्मणि लटि यकि वचिस्वपियजादीनामिति
संप्रसारणे पूर्वरूपे आयते इति रूपम्· तस्यैव धातोः कर्मणि लङि आयत इति रूपम्· अत्र वान्तादेशनिवृत्त्यर्थं न यकीति सू।
नस्तु· यकि परे एचो वान्तादेशो नेत्यर्थात्सिद्धम् ओयते आयतेति· किं धातोस्तन्निमित्तस्येति सूत्रेणेति कुबुद्धिकल्पनम्·
न च गोशब्दादाचारक्विबन्तात्कर्तरि क्विप्· गोषु साधु गोयमित्यत्र वान्तादेशप्रसङ्गः यक्परत्वाभावेन न यकीति निषेधाप्रवृत्तेः
अत्र मते तु न भवतु यादिप्रत्ययनिमित्तकत्वाभावादिति वाच्यम्· न चैवं सन्ध्यक्षरमन्त्यमस्तीति इको गुणवृद्धी वदत्रजेति सूत्रा। राम
स्य भाष्यप्रामाण्यात् आतः श्यनि आदेच उपदेशेऽशितीति सूत्रस्य भाष्यप्रामाण्यादेजन्तेभ्य आचारक्विपोनभिधानमेव· एवं १
च गोयमित्यस्यासाधुत्वमेव अयोपि भूधातोरन्येभ्योपि दृश्यत इति विचि कीलालप आगतमिति भाष्यप्रामाण्येन लोकेपि क

3761

॥श्रीकाशीजीमेमहल्लाघुघुरानाश्यामाकीगलीश्रीयुतबाबूसाहेबबाबूहरखचंदजीके
॥ वाडेमेदुर्गाप्रसादकटारेकेगणेशयंत्रालयमेपूरवपसावलीछापीगई लिखाराम
॥ दासका छापनेवालागोपालजिस्कोलेनाहोयउसेकुंजगलीकेपश्चिमफाटकपरे
॥ दुर्गाप्रसादकटारेकेदुकानपरमिलेगी ॥ ६ ॥